एकात्मज्ञानेशोकाद्यभावनिरूपणं	२१	५४
आत्मनोब्रह्मत्वंश्रुतिसिद्धं	२२	५५
प्रपंचस्यालीकत्वंस्वप्नदृष्टांतेन	२२	५६
अवस्थात्रयमिथ्यात्वस्यात्मनोनित्यत्वस्यचनिरूपणं	२२	५७
अनेकदृष्टांतैर्जीवस्यकल्पितत्वनिरूपणं	२२	५९
प्रपंचस्यब्रह्मणिकल्पितत्वेबहवोदृष्टांताः	२३	६१
प्रपंचरूपेणब्रह्मैवभातीत्यत्रबहवोदृष्टांताः	२३	६३
ब्रह्मणेवसर्वव्यवहारोभवतीतियुक्त्या निरूपणं	२३	६५
प्रपंचेगृह्यमाणेपिब्रह्मणएवग्रहणंभवतीत्यत्रदृष्टांतः	२४	६७
अज्ञानादात्माशुद्धोभातीत्यादिनिरूपणं	२४	६८
अहंनज्ञानानंतरमात्मानात्मविभागस्यव्यर्थत्वं	२४	६९
अविवेकिनोदेहनाद्यात्मत्वस्यानेकदृष्टांतैर्निरूपणं	२४	७०
अज्ञानादात्मनिदेहत्वंपश्यतीत्यत्रहवोदृष्टांताः	२५	७५
ज्ञानादेहाध्यासनिवृत्तिनिरूपणं	२६	८७
आत्मविचारेणाज्ञानिक्रमणंकर्त्तव्यमितिनिरूपणं	२६	८९
युक्त्याप्रारब्धकर्मणोनिराकरणं	२७	९०
अज्ञानाज्जगत्सत्यमितिज्ञानात्तन्निवृत्तिरितिदृष्टांताभ्यांनिरूपणं	२८	९४
अज्ञवोधार्थंप्रारब्धमस्ति	२९	९७
ज्ञानिनःप्रारब्धाभावेश्रुतेःप्रमाणत्वेनोपन्यसनं	२९	९८
प्रारब्धांगीकारेदोषनिरूपणं	२९	९९
पंचदशराजयोगांगवर्णनमात्मज्ञातेश्चमयो	३०	१००
निदिध्यासस्यावश्यकत्वं जनूनिरूपणं	३१	१०१
पंचदशांगानांनामानि	३१	१०२
यमस्यलक्षणं	३१	१०४
नियमस्यलक्षणं	३१	१०५

त्यागस्यलक्षणं	३२	११६
मौनस्यलक्षणं	३२	११७
विजनदेशस्यनिरूपणं	३३	११०
कालस्यनिरूपणं	३३	१११
आसनस्यनिरूपणं	३३	११२
सिंहासनस्यनिरूपणं	३४	११३
मूलबंधस्यनिरूपणं	३४	११४
देहसाम्यस्यनिरूपणं	३४	११५
दिक्स्थितेर्निरूपणं	३४	११६
प्राणायामस्यनिरूपणं	३५	११८
रेचकपूरकादिविविधप्राणायामस्यनिरूपणं	३५	११९
मत्याहारस्यनिरूपणं	३६	१२१
धारणायानिरूपणं	३६	१२२
ध्यानस्यनिरूपणं	३६	१२३
समाधेर्निरूपणं	३६	१२४
निदिध्यासस्याबधेर्निरूपणं	३७	१२५
निदिध्यासस्यफलं	३७	१२६
समाधिविज्ञानानिरूपणं	३७	१२७
वृत्तेरेवबंधमोक्षकारणत्वं	३७	१२९
ब्रह्मवृत्तिशून्यानांनिंदा	३८	१३०
ब्रह्मवृत्तिपराणांवंदनीयत्वं	३८	१३१
ब्रह्मवृत्तिपराणांबोधदार्ढ्यान्मुक्तिः	३८	१३२
बोधरहितकेवलशब्दादिनांमोक्षाभावनिरूपणं	३८	१३३
ब्रह्मनिष्ठानांब्रह्मवृत्त्येवस्थितिनिरूपणं	३८	१३४
कायेत्यादिपंचभिःश्लोकैर्वेदांतसिद्धांत विचारनिरूपणं	३८	१३५
ब्रह्मज्ञानेनब्रह्मत्वमेवेत्यत्रदृष्टांतकथनं	४०	१४०
मपंचस्यब्रह्मत्वेनभावनं	४०	१४१
राजयोगस्योपसंहारः	४१	१४३
शुद्धचित्तानांकेवलराजयोगस्यमुक्तिप्रदत्व निरूपणं	४१	१४४

इत्यनुक्रमणिका समाप्ता.

मणि.

अथाऽपरोक्षानुभूति प्रारंभः

यह पुस्तक मुंबईमें पोर्टुगीस चर्चस्ट्रीट घर
नंबर ३५में नारायण श्रीकृष्णजीके पास और
दिल्लीमें दरीबा बजारमें मुंबईका पुस्तकों-
की दुकानमें गंगाविष्णु खेमराजके पास
मिलेंगे.

किंमत ८ आना.

प्रस्तावना.

श्रीगणेशायनमः संनिसंभृतिमुंबापुर्यां विपश्चिद्वर्याः सकलश्रुतिशिरः-
शास्त्रपयः पयोधिपारीणाः निखिलजननमनःप्रबोधनधुरीणाः प्रपन्नजन
धारणचरणाः श्रीमज्जीवनरामतनूजन्मानो गुरवो जयकृष्णाभिधानाः
येषां च निपीयाऽऽनृप्ति सुधाधाराकारां वाचं जना नान्यदाकर्णयंति
करुणापूर्णांतःकरणैर्जिज्ञासुजनप्रार्थितै स्तैर्मन्दमत्यनुजिघृक्षया जिज्ञा
सूना मपरोक्षतयात्मस्वरूपानुभवाय श्रीमत्परमहंसपरिव्राजकाचार्य
श्रीशंकराचार्य विरचितोऽय मपरोक्षानुभूतिनामाग्रंथो लेखकपरंपरा
दोषवशाद्येषु येषुस्थलेष्वशुद्ध आसीत्तत्रतत्र संशोधितः तद्दीकाचेयं य
त्रयत्र प्रतीकाभावस्तत्र प्रतीकैः यत्रक्वचिच्चावतरणिकाया न्यूनतयाऽ-
व्यक्तार्थतां तत्र तत्परिहारपूर्वं व्यक्तार्थीकरणेन कुत्रचिदितरपद्यार्थप
रायाः श्रुत्याः लेखकपरंपरादोषेण पद्यांतरटीकायांस्थितायाः पुनःस्व-

स्थानोपन्यासेन काव्यपेक्षितश्रुतीनां पूर्णतयोपन्यसनेन यत्रचाऽपूर्णतयाऽ
र्थासंगति स्तत्रतत्पूरणतोऽर्थसम्मेलनेन क्वचिदशुद्धशोधनेनच परिष्कृता
एवं शुद्धस्य प्रायेण दुर्लभस्याऽस्य सटीकस्यग्रंथस्य सुलभत्वमाशासा-
नास्ते तदाज्ञाऽनुसंधानसावधानं वेदांतशास्त्रदत्तावधानं वणिजं निधि
क्रमनन्नजं नारायणजी इतिप्रसिद्धाभिधानं मां मुद्रापणाय समादिशन्
मया चकुसुममालामिव तदाज्ञांशिरसावहुमानेन गृहीतामानेन सर्वलोक
शोकनिकृंतनोयं ग्रंथो विक्रमशाकस्य रोपेरामांकेमहीं मितेब्दे श्रावण-
मासे कृष्णपक्षे त्रयोदश्यां तिथौ भृगुवासरे मुद्रालये मुद्रापितः वि
लोक्य चेमं समदृशः संतः संतुष्टा भवंतु भवाप्ययभंजनश्च भगवान्
भव्याय भूयादिति सप्रणतिशतमभ्यर्थये.

श्रीगणेशायनमः स्वप्रकाशश्चहेतुर्यः परमात्माचिदात्मकः अपरोक्षानुभू
त्याख्यः सोहमस्मिपरंस्फुरत् १ ईशगुर्वात्मभेदाद्यः सकलव्यवहारभूः औपा
धिकःस्वचिन्मात्रः सोऽपरोक्षानुभूतिकः २ तदेवमनुसंधाय निर्विघ्नोस्वेष्टदेव
तां अपरोक्षानुभूत्याख्या माचार्योक्तिंप्रकाशये ३ यद्यपीयंस्वतःस्पष्टा त
थापिस्वात्मसिद्धये यत्नोयंसोपिसंक्षेपा क्रियतेऽनर्थनाशनः ४ कोहमुल्का
करःकायं सूर्यस्तेजोनिधिःकिल तथापिभक्तिमान्कःकिं नकुर्यात्स्वहितायये
५ तत्राचार्याः स्वेष्टपरदेवताऽनुसंधानलक्षणं मंगलं निर्विघ्नग्रंथसमाप्तये स्व
मनसिकृत्वा शिष्यशिक्षायै ग्रंथादौ निबध्नंति श्रीहरिमिति अहं तं नमामी
त्यन्वयः अत्रेयं प्रक्रिया पदार्थो द्विविधः आत्माऽनात्माचेति तत्रात्मा द्विवि
धः ईश्वरो जीवश्चेति एतावपि द्विविधौ शुद्धाऽशुद्धभेदात् तत्राऽशुद्धो मा

याऽविद्योपाधित्वेन भेदव्यवहारहेतू शुद्धौत्वभेदव्यवहारहेतू तथाऽनात्मापि त्रिविधः कारणसूक्ष्मस्थूलभेदात् एतदेव शरीरत्रयमिति व्यवह्रियते एवं चिज्जडरूपवैलक्षण्या तमःप्रकाशयोरिव विभक्तयोरुभयोरात्माऽनात्मनोरविवेक एव बंधकारणं तयोर्विवेकस्तु मोक्षकारणमितिदिक् तत्र तावदहं शब्देन देहत्रयविशिष्टत्वेनाशुद्धोजीवः अस्येवाऽपकृष्टत्वात् तं नमामि तं माया तत्कार्यं हन्तृत्वेपि तदाश्रयभूतत्वेन सर्वकारणं वेदांतप्रसिद्धमीश्वरं एतस्यैव सर्वोत्कृष्टत्वात् नमामि नमस्करोमि स्वात्मत्वेनानुसंदधामीत्यर्थः तस्यैव सर्वोत्कृष्टत्वेनानुसंधानयोग्यत्वमाह श्रीहरिमिति श्रियंदधानमित्यर्थः यद्वा स्वाश्रयनया श्रियते स्वीक्रियते प्रलयसुषुप्त्यादौ सर्वभूतैरिति श्रीर्जीवत्वोपाधिभूताऽविद्या तां हरत्यात्मज्ञानप्रदानेन नाशयतीति श्रीहरिस्तं यद्वा सएव सर्वाधिष्ठानतया श्रीरित्युच्यते श्रीरेवहरिस्तं ननु किमनेनाविद्यातत्कार्यहरणेनेत्याशंक्य परमपुरुषार्थप्राप्तिर्भवतीति सूचयितुं तस्य परमानंदरूपतामाह परमानंदमिति परमोऽविनाशित्वनिरतिशयत्वाभ्यामुत्कृष्ट आनंदः सुखविशेषो

स्तद्रूपमित्यर्थः तर्हि वैषयिकसुखवज्जडःस्यादित्यत आह उपदेष्टारमिति आ
चार्यद्वारात्मसुखोपदेशकं चिद्रूपमित्यर्थः ननु केवलानंदस्य कथमुपदेष्टृत्वमि
त्यत आह ईश्वरमिति ईष्टेऽसावीश्वरः विचित्रशक्तित्वात्सर्वसमर्थस्तं नमा-
मीत्यन्वयः एवमपि परिच्छिन्नत्वात् घटादिवदनात्मत्वंस्यादित्यतआह व्या
पकमिति स्वसत्तायकाशाभ्यां नामरूपे व्याप्नोति सव्यापकस्तं परिच्छेदकस्य

अपरोक्षानुभूतिर्वै प्रोच्यतेमोक्षसिद्धये
सद्भिरेवप्रयत्नेन वीक्षणीयामुहुर्मुहुः २

देशकालादेर्मायिकत्वादनंतमित्यर्थः ननुव्याप्यव्यापकभावेनानंतत्वमसिद्धमि
त्यतआह सर्वलोकानांकारणमिति अभिन्ननिमित्तोपादानमित्यर्थः सत्यं ज्ञा
नमनंतं ब्रह्म आत्मनात्मानमभिसंविवेशेत्यादिश्रुतेः १ इदानीं प्रेक्षावत्प्र
वृत्तये ऽनुबंधचतुष्टयं दर्शयन् स्वचिकीर्षितं प्रतिजानीते अपरोक्षेति वै
इत्यव्ययेन विहदनुभवं प्रमाणयति तथाचायमर्थः विहदनुभवप्रसिद्धा या

तत्त्वमस्यादिमहावाक्यश्रवणजा प्रत्यगभिन्नब्रह्मविषया अपरोक्षानुभूति
रक्षाणामिंद्रियाणां परमनीतं नष्टवतीत्यपरोक्ष मिंद्रियाधिष्ठानतत्प्रका
त्वाभ्यां नित्यप्रत्यक्षस्वप्रकाशात्मतत्वं तस्यानुभूतिर्वृत्त्यारूढाखंडता य
द्वा अपरोक्षा चासावनुभूतिश्चेत्यपरोक्षानुभूतिर्विद्या ऽपरपर्यायो ब्रह्म-
साक्षात्कार स्तत्साधनग्रंथोप्युपनिषच्छब्दवदपरोक्षानुभूतिशब्देनोपचर्य
ते झटित्यवलोकनमात्रेणैवोत्तमाधिकारिणां ब्रह्मात्मसाक्षात्कारकारणं ग्रं
थविशेषइत्यर्थः अनेन नित्यापरोक्षब्रह्मात्मतत्वं विषयो दर्शितः स मो
च्यते प्रकर्षेण तत्तदाशंका निराकरणपूर्वकं सिद्धांतरहस्य प्रदर्शनरूपेणो
च्यते कथ्यतइत्यर्थः अस्माभिः पूर्वाचार्यैरित्यर्थादध्याहारः ननु प्रायः प्र
योजनमनुद्दिश्य नमंदोपि प्रवर्तत इतिन्याया न्मारंभणीयोग्रंथ इत्याशं-
क्य प्रयोजनमाह मोक्षसिद्ध्यइति मोक्षोनाम स्वाविद्याकल्पिता- ६ ५२
द्यात्मत्वाभिमानरूपबंधनिवृत्तिद्वारा स्वस्वरूपावस्थानं तस्यसिद्धिः
प्राप्तिस्तदर्थं अनेन सर्वाऽनर्थनिवृत्तिद्वारा परमानंदावाप्तिरूपं

दर्शितं किंलक्षणाऽपरोक्षाऽनुभूतिः सद्भिः साधुभि र्नित्यानित्यवस्तुविवेकादि
साधनचतुष्टयसंपन्नै र्मुमुक्षुभिरित्यर्थः एवशब्दान्नान्यैः कर्मोपासनाधि
कारिभिरितिभावः मुहुर्मुहुर्नैरंतर्यदीर्घकालाभ्यासप्रयत्नेन स्वानभिक्षादा
वप्यनादरं कृत्वेत्यर्थः वीक्षणीया गुरुमुखादवगत्य विचारणीया अनेन मु
मुक्षुरधिकारी दर्शितः एतेनैवार्थात् पूर्वकांडोत्तरकांडयोः साध्यसाधनभा

स्ववर्णाश्रमधर्मेण तपसाहरितोषणात्
साधनंप्रभवेत्पुंसां वैराग्यादिचतुष्टयं ३

वः संबंधश्च दर्शितो भवतीति बोद्धव्यं २ ननु कार्यस्य कारणाधीनत्वात्
पूर्वोक्तसाधनचतुष्टयस्य किंकारणमित्याशंक्याह स्ववर्णेति अत्र स्वशब्दे
न मुख्यगौणमिथ्याभेदेन त्रिविधेषु साक्षिपुत्रादिदेहादिलक्षणेष्वात्मसु मध्ये
मिथ्यात्मायोग्यत्वाद्गृह्यते तस्य देहादे ब्राह्मणादिवर्ण ब्रह्मचर्याद्याश्रम प्र
युक्तेन धर्मेण ब्रह्मार्पणकृतकर्मानुष्ठानजन्येना ऽपूर्वेण पूर्वमीमांसामसि

हेन भाविफलाधारभूतेन पुण्यादिशब्दवाच्येनेत्यर्थः तया तपसा कृच्छ्र चांद्रायणादिना प्रायश्चित्तेनेत्यर्थः पुनः हरितोषणा भगवत्प्रीतिकरात्सर्व भूतदयालक्षणात् कर्मविशेषात् एतैस्त्रिभिः साधनैः वैराग्यादिचतुष्टय रूपं साधनं मोक्षसाधको धर्मविशेषः पुंसां प्रभवेत् संभावनायांलिङ् यद्वैवमन्वयः स्वधर्माख्यमधर्मरूपेण तपसाकृत्वा यद्धरितोषणं तस्मादिति

ब्रह्मादिस्थावरांतेषु वैराग्यंविषयेष्वनु
यथैवकाकविष्ठायां वैराग्यंतद्धिनिर्मलं ४

यद्यपि साधनचतुष्टयस्य विवेकादिक्रमेण हेतुहेतुमद्भावस्तथापि वैराग्यस्या साधारणकारणतां द्योतयितु मादौग्रहणं कृतमितिबोद्धव्यं ३ कीदृशं तद्वैराग्या दिचतुष्टयमित्याकांक्षायां तत्स्वयमेव व्याचष्टे ब्रह्मादीत्यारभ्य चक्रव्यासामुमु क्षुतेत्यंतेन श्लोकषट्केन ग्रंथेन तत्रादौ वैराग्यस्य लक्षणमाह ब्रह्मा- दिस्थावरांतेष्विति ब्रह्मादिस्थावरांतेषु सत्यलोकादिमर्त्यलोकांतेषु भोगसा

धनेषु अनु कर्मजन्यत्वेनानित्यत्वं लक्षीकृत्येत्यर्थः वैराग्यं इच्छाराहित्यं त
दृष्टांतमाह यथैवेति यथैव काकविष्ठायां वैराग्यं गर्दभादिविष्ठायामपि
कदाचित् कस्यचित् ज्वरशांत्यर्थं ग्रहणेच्छा भवति अतः काकविष्ठाया ग्रह
णं उपलक्षणमेतद्भांत्यादीनां विषयेष्विच्छानुदये वैराग्यस्य हेतुगर्भितं वि
शेषणमाह तदिति हियस्मा त्तद्वैराग्यं निर्मलं रागादिमलरहितं ४ इदानीं

नित्यमात्मस्वरूपंहि दृश्यंतद्विपरीतगं
एवंयोनिश्चयःसम्य ग्विवेकोवस्तुनःसवै ५

वैराग्यकारणं विवेकं लक्षयति नित्यमिति वेद्यसिद्धं सः वस्तुनः पदार्थस्य
विवेको विवेचनविशेषो ज्ञेयः सक इत्यतआह एवमिति य एवंप्रकारेण
सम्यक् संशयादिशून्यो निश्चयः एवंकथमित्यतआह नित्यमिति हीतिवि
द्वदनुभवंप्रसिद्धमात्मस्वरूपं नित्य मविनाशि अबाध्यं सत्यमित्यर्थः अवि-
नाशीवा अरेयमात्मेनिश्रुतेः दृश्य मनात्मस्वरूपं तद्विपरीतगं तदात्मस्वरू

पं तस्माद्विपरीतत्वेन गच्छति प्राप्नोति व्यवहारभूमिमिति तथाविधं विना शि बाध्यमित्यर्थः अत्रेदमनुमानमपि सूचितं भवति आत्मस्वरूपं नित्यं द्र ष्टृत्वात् यन्नित्यं तन्न द्रष्टृ यथाघटादीतिकेवलव्यतिरेकी हेतुः तथाऽना त्मस्वरूप मनित्यं दृश्यत्वात् यन्नानित्यं तन्न दृश्यं यथात्मस्वरूपमित्यय मपि केवल व्यतिरेकी हेतुः ५ तदेवं वैराग्यकारणं विवेकं व्याख्याय वैराग्य

सदैवबासनात्यागः शमोयमिनिशब्दितः
निग्रहोबाह्यवृत्तीनां दमइत्यभिधीयते ६

कार्यं शमादिषट्कं लक्षयति सदैवेत्यादित्रिभिः श्लोकैः सदेव सर्वस्मिन्न पिकाले वासनात्यागः पूर्वसंस्कारोपेक्षाऽयंशमइतिशब्दितः अंतःकरणनिग्र हः शमशब्दार्थः बाह्यवृत्तीनां श्रोत्रवागादीनां निग्रहो निषिन्द्धप्रवृत्तिनिरस्का रोदमइति शब्देनाभिधीयते कथ्यते ६

विषयेभ्यइति हीतिप्रसिद्धेभ्यो बंधकेभ्यः शब्दादिभ्यो या परावृत्ति र्निवृ
त्ति रनित्यत्वादिदोषदर्शनेन ग्रहणानिच्छा सोपरतिरुच्यत इत्यर्थः कीदृ
शीसेत्यतआह परमेति परमं उत्कृष्टमात्मज्ञानं यस्याः सकाशाज्जायते
सा परमाआत्मज्ञानसाधनभूतेत्यर्थः अनया सर्वकर्मसंन्यासो लक्ष्यते किंच

विषयेभ्यः परावृत्तिः परमोपरतिर्हिसा
सहनंसर्वदुःखानां तितिक्षासाशुभामता ७
निगमाचार्यवाक्येषु भक्तिःश्रद्धेतिविश्रुता
चित्तैकाग्र्यंतुसल्लक्ष्ये समाधानमितिस्मृतं ८

सहनमिति सर्वदुःखानां सर्वदुःखसाधनानां शीतोष्णादिद्वंद्वानां यत्सहनं
प्रतीकारानिच्छा साशुभा स्वरूपा तितिक्षा मतानिदुषामित्यर्थः ७ अ
पिच निगमेति निगमाचार्यवाक्येषु वेदगुरुवचनेषु यद्वोपनिषद्व्याख्यानु
पदेशेषु भक्तिर्भजनं विश्वास इत्यर्थः सा श्रद्धेति विश्रुता वेदांतप्रसिद्धा

तुपुनः सल्लक्ष्ये सदेव सोम्येदमग्र आसीदित्यादि श्रुतिलक्ष्ये प्रत्यगभिन्ने ब्रह्मणि चित्तैकाग्र्यं तदेकजिज्ञासेत्यर्थः तत्समाधानमिति स्मृतं ८ एवं शमादिषट्कमभिधायैतत्कार्यभूतां मुमुक्षुतामाह संसारबंधेति इतिया सुदृढाबुद्धिः सा मुमुक्षुता वक्तव्येत्यन्वयः साकेत्यतआह भोविधे महेव यद्वा

संसारबंधनिर्मुक्तिः कथंमेस्यात्कदाविधे
इतियासुदृढाबुद्धि र्वक्तव्यासामुमुक्षुता ९
उक्तसाधनयुक्तेन विचारःपुरुषेणहि
कर्तव्योज्ञानसिद्ध्यर्थं मात्मनःशुभमिच्छता १०

सर्वकर्तर्विधातर्ब्रह्मन् मे मम संसारबंधनिर्मुक्तिर्नानायोनिसंबंधनिवृत्तिः कदा कस्मिन्काले कथं केनप्रकारेण भवेदित्येवंरूपा बुद्धिर्मुमुक्षुतेत्यर्थः ९ इदं साधनचतुष्टयं यदर्थमुपन्यस्तं तदिदानीं दर्शयति उक्तेति उक्तानि ब्रह्मादीत्यारभ्य वक्तव्यासा मुमुक्षुतेत्यंतग्रंथसंदर्भेण वर्णितानि यानि वेदा

ग्यादि साधनानि ज्ञानोपकरणानि तैर्युक्तेन पुरुषेणाधिकारिणा देहवता मनुष्योत्तमेन हीतिविद्वत्प्रसिद्धत्वेन वक्ष्यमाणलक्षणः यद्वा हीत्यव्ययमे वार्थेऽन्यनिषेधार्थइत्यर्थः विचारो विवेकः कर्तव्य आवर्त्तयितव्यः किम र्थमित्यतआह ज्ञानसिद्ध्यर्थमिति आत्मनो ज्ञानसिद्ध्यर्थं ब्रह्मात्मैक्यबो धोद्भवनाय नन्वात्मज्ञानसिद्धा कः पुरुषार्थ इत्याशंक्य मोक्षाख्यं च

नोत्पद्यतेविनाज्ञानं विचारेणान्यसाधनैः
यथापदार्थभानंहि प्रकाशेनविनाक्वचित् ११

तुर्यपुरुषार्थरूपं फलं द्योतयन् पुरुषार्थं विशिनष्टि शुभमिति सुष्ठं परमा नंदरूपत्वेन मंगलं मोक्षसुखमित्यर्थः इच्छता प्रार्थयता आत्मनःसुख मितिवाऽन्वयः १० ननु ज्ञानसिद्ध्यर्थं विचारएव कर्तव्यइति नियमः कु तः किंवत इत्याशंक्य सदृष्टांतमाह नोत्पद्यतइति विचारेणाविना अ-न्यसाधनैः कर्मोपासनालक्षणैः ज्ञानं नोत्पद्यते तत्र दृष्टांतमाह यथेति

यथा क्वचित्कस्मिंश्चिद्देशे सूर्यादिप्रकाशेनविना पदार्थभानं घटादिवस्तु प्रकाशोनभवति हीतिसर्वजनप्रसिद्धं अतो नियमः क्रियतइतिभावः ११ नहिं सविचारः कीदृश इत्यतआह कोहमिति अहं कर्ता करणीत्यर्थः व्यवह्रियमाणः कः किंस्वरूपः तथा इदं जगत् स्थावरजंगमात्मकं कथं क स्माज्जातं किमधिष्ठानमित्यर्थः तथा ऽस्यप्रत्यक्षादिप्रमाणसिद्धस्य जग

कोहंकथमिदंजातं कोवैकर्त्ताऽस्यविद्यते
उपादानंकिमस्तीह विचारःसोयमीदृशः १२

तः कर्त्तोत्पादकः कोविद्यते वे इतिविकल्पं द्योतयति किं जीवादृष्टं कर्तृ किंवेश्वरः किंवान्यदेव किंचिदिति विकल्पः किंचेह जगति उपादानं घटस्य मृद्वत् किमस्ति अयमात्म जगत्कारणविषयः ईदृश एवंस्वरूपो विचारः सए व ज्ञानसाधनमित्यर्थः १२ ७ ७ ७

ननु चैतन्यविशिष्टः कायः पुरुषइति बार्हस्पत्यसूत्रा देहाकारेण परिण
तानि पृथिव्यादि चत्वारिभूतान्येवात्मेति चार्वाका वदंति स एव कर्ता भ
क्तीत्यादि सर्वव्यवहारमूलमिति सर्वजनप्रसिद्धो सत्या मात्मविषयो
विचारो नस्यादित्यतआह नाहमिति अहमहंशब्दप्रत्ययालंबनः प्रत्यगा
त्मा भूतगणो यो देहः स न भवामि तस्य घटादिवद्दृश्यत्वादित्यर्थः नहीं

नाहंभूतगणोदेहो नाहंचाक्षगणस्तथा
एतद्विलक्षणःकश्चि द्विचारःसोयमीदृशः १३

द्रियगणस्त्वं स्या इति चार्वाकैकदेशिमतमुत्थाप्य दूषयति नाहमिति
चपुनरक्षगणः श्रोत्रादींद्रियसंघातोप्यहं नभवामि तथेति पदेन देहवदिं
द्रियगणस्यापि भूतविकारत्वं दर्शितं सवा एष पुरुषोन्नरसमयः अन्न
मयं हि सोम्य मन आपोमयः प्राणस्तेजोमयीवागित्यादिश्रुतिरुभयत्र
प्रमाणं ननु यदि देहद्वयं त्वं नासि तर्हि शून्यमेवस्या इत्याशंक्याह एत

दिति एतद्विलक्षणः एताभ्यां स्थूलसूक्ष्मदेहाभ्यां विपरीतधर्मकोस्मि अस्थूलमनण्वकृस्वमित्यादिश्रुतेः कश्चिदिति जात्यादि रहितत्वान्मनोवाचामगोचरत्वं दर्शितं अयमीदृशः सविचार इतिव्याख्यातार्थश्चतुर्थः पादः श्लोकचतुष्टयेपि बोद्धव्यः १३ तदेवं कोहमित्येतन्निश्चित्येदानीं कथमिदं जानामित्यस्य निश्चयः क्रियते तत्र पृथिव्यादि भूतानिकार्यत्वात्स्वस्व

अज्ञानप्रभवंसर्वं ज्ञानेनप्रविलीयते
संकल्पोविविधःकर्त्ता विचारःसोयमीदृशः १४

परमाणुभ्यो जायंत इति तार्किकादयो मन्यंते कर्मणो जायंते इतिमीमांसकाः प्रधानादेवेति सांख्याः तदेतन्निराकुर्वन्नाह अज्ञानेति सर्वं जगदिदं नामरूपात्मक मज्ञानप्रभव मज्ञानात्पूर्वोक्तस्वस्वरूपास्फुरणात्प्रभवति तथाविधं अत एवैतद्विरोधिना ज्ञानेन स्वस्वरूपस्फुरणेन तम इवप्रकाशेन प्रविलीयते निश्शेषलीनं भवतीत्यर्थः कोवैकर्तेत्यस्य निर्णयमाह संकल्पइति

विविधो नानाप्रकारः संकल्पः इदंकरिष्यामीत्यादिलक्षणोंतःकरणपरि-
णामः कारणानुकूलव्यापारवान् कर्त्तीशेषंपूर्वोक्तं १४ अथोपादानं किमस्ती
त्यस्य निर्णयमाह एतयोरिति एतयोरज्ञानसंकल्पयो र्यदुपादानं उत्प
त्तिस्थितिनाशाय कारणं तत्तु सत्कालत्रयाबाध्यं ब्रह्मैव नान्यदित्यर्थः
अत एवाधिष्ठान ज्ञाननिर्वर्त्यो ऽज्ञानकार्यत्वेन मिथ्याभूतमपिजगत्

एतयोर्यदुपादान मेकंसूक्ष्मंसदव्ययं
यथैवमृद्घटादीनां विचारेःसोयमीदृशः १५

यावज्ज्ञानोदयं रज्जुसर्पादिवत् संसारभयव्यवहारक्षमं भवेदितिभावः
ब्रह्मणः सत्त्वेहेतुः अव्ययमिति अव्ययमपक्षयरहितं अनेनैतत्पूर्वभू
ता अपि जन्मादिविकारा निरस्ताः नाशश्च निरस्तः षड्भावविकाररा-
हित्ये हेतुः एकं सजातीयादिभेदशून्यं तर्हि कुतो भेदश्यते नचाह सू
क्ष्ममिति सूक्ष्मं मनोवागादींद्रियागोचरं तेषां प्रवृत्तिनिमित्त जातिक्रि

यादिशून्यत्वादित्यर्थः ब्रह्मणउपादानत्वे दृष्टांतमाह यथैवेति यथैव मृत् घटादीनामुपादानं नथैवेत्यर्थः एवंप्रकारेण कार्यकारणभेदो नाममात्रमितिसूचितं १५ ननु यद्यपि कार्यकारणभेदो वाचारंभणमात्रस्तथापि जीवब्रह्मणोर्भेदोवास्तवःस्यादित्याशंक्याह अहमिति अत्र यत इत्यध्याहारस्तथाचायमर्थः यतोहमहंप्रत्ययवेद्योप्येकः सजातीयादिभेदशू-

अहमेकोऽपिसूक्ष्मश्च ज्ञातासाक्षीसदव्ययः
तदहंनात्रसंदेहो विचारःसोयमीदृशः १६

न्यो मनुष्यमात्रेप्यहंबुद्धेरेकत्वप्रतीतेरित्यर्थः चपुनः सूक्ष्म इंद्रियागोचरः पुनर्ज्ञाताऽहंकारादिप्रकाशकत्वेनचेतनइत्यर्थः तथासाक्षी साक्षादिंद्रियार्थसन्निकर्षविनैवेक्षतेपश्यतिप्रकाशयतीति साक्षीनिर्विकारइत्यर्थः अतएव सदव्ययः संश्चासावव्ययश्चविनाशापक्षयोपलक्षितसर्वविकारशून्यइत्यर्थः यस्मादेवंभूतोऽहं तत्तस्मादहमहंप्रत्ययवेद्य स्तत्सत्यज्ञा

नादिलक्षणं ब्रह्म अत्रसंदेहो नास्तीत्यर्थः सोयमीदृशो विचारइति १६
एतदेव जीवब्रह्मैक्यमज्ञानप्रदर्शनेन द्रढयति आत्मेत्यादिपंचभिः यतो
ऽहंप्रत्ययवेद्य आत्मा अतति संततभावेन जाग्रदादि सर्वावस्यास्वनुवर्त्तत
इत्यात्मा अवस्थात्रयभावाभावसाक्षित्वेन सत्यज्ञानादिस्वरूपइत्यर्थः स
त्वं पदलक्ष्यार्थोपि तत्पदलक्ष्यार्थ एव विनिष्कलो विशेषेणनिर्गतकलो

आत्माविनिष्कलोह्येको देहोबहुभिरावृतः
तयोरैक्यंप्रपश्यंति किमज्ञानमतःपरं १७

निरवयवइत्यर्थः अन्यथा सावयवत्वे घटादिवद्विनाशित्वापत्तिरितिभावः
अत्रहेतुः एकः हीति एकमेवाद्वितीयमित्यादि श्रुतिप्रसिद्धिं द्योतयति न
नु तथा लिंगदेहोप्यस्तीतिचेन्नेत्याह देहइति देहो लिंगदेहः सूक्ष्मशरीर-
मिति यावत् सबहुभिः कलाभिः श्रोत्रादिबुद्ध्यंताभिः सप्तदशभिरावृत
आच्छादितस्तत्संघातइत्यर्थः अतएव लिंगदेहस्य निरवयवत्वाद्यभावात्

यादिशून्यत्वादित्यर्थः ब्रह्मणउपादानत्वे दृष्टांतमाह यथैवेति यथैव मृत् घटादीनामुपादानं तथैवेत्यर्थः एवंप्रकारेण कार्यकारणभेदो नाममात्रमितिसूचितं १५ ननु यद्यपि कार्यकारणभेदो वाचारंभणमात्रस्तथापि जीवब्रह्मणोर्भेदोवास्तवःस्यादित्याशंक्याह अहमिति अत्र यत इत्यध्याहारस्तथाचायमर्थः यतोहमहंप्रत्ययवेद्योप्येकः सजातीयादिभेदशू- नुभू-

अहमेकोऽपिसूक्ष्मश्च ज्ञातासाक्षीसदव्ययः
तदहंनात्रसंदेहो विचारःसोयमीदृशः १६

न्यो मनुष्यमात्रेप्यहंबुद्धेरेकत्वप्रतीतेरित्यर्थः चपुनः सूक्ष्म इंद्रियागोचरः पुनर्ज्ञाताऽहंकारादिप्रकाशकत्वेनचेतनइत्यर्थः तथासाक्षी साक्षादिंद्रियार्थसन्निकर्षविनैवेक्षतेपश्यति प्रकाशयतीति साक्षीनिर्विकारइत्यर्थः अतएव सदव्ययः संश्चासावव्ययश्चविनाशापक्षयोपलक्षितसर्वविकारशून्यइत्यर्थः यस्मादेवंभूतोऽहं तत्तस्मादहमहंप्रत्ययवेद्य स्तत्त्वत्यज्ञा ८

नादिलक्षणं ब्रह्म अत्रसंदेहो नास्तीत्यर्थः सोयमीदृशो विचारइति १६
एतदेव जीवब्रह्मैक्यमज्ञानप्रदर्शनेन द्रढयति आत्मेत्यादिपंचभिः यतो
ऽहंप्रत्ययवेद्य आत्मा अतति संततभावेन जाग्रदादि सर्वावस्थास्वनुवर्त्तेन
इत्यात्मा अवस्थात्रयभावाभावसाक्षित्वेन सत्यज्ञानादिस्वरूपइत्यर्थः स
त्वं पदलक्ष्यार्थोपि तत्पदलक्ष्यार्थ एव विनिष्कलो विशेषेणनिर्गतकलो

आत्माविनिष्कलोह्येको देहोबहुभिरावृतः
तयोरैक्यंप्रपश्यंति किमज्ञानमतःपरं १७

निरवयवइत्यर्थः अन्यथा सावयवत्वे घटादिवद्विनाशित्वापत्तिरितिभावः
अत्रहेतुः एकः हीति एकमेवाद्वितीयमित्यादि श्रुतिप्रसिद्धिं द्योतयति न
नु तथा लिंगदेहोप्यस्तीतिचेन्नेत्याह देहइति देहो लिंगदेहः सूक्ष्मशरीर-
मिति यावत् सबहुभिः कलाभिः श्रोत्रादिबुद्ध्यंताभिः सप्तदशभिरावृत
आच्छादितस्तत्संघातइत्यर्थः अतएव लिंगदेहस्य निरवयवत्वाद्यभावात्

ज्ञानेन तत्कारणाऽज्ञाननिवृत्तौ निवृत्तिरन्यथाऽनिर्मोक्षप्रसंग इतिभावः नुभूः
एवमनिर्वैलक्षण्ये सत्यपि तयोरात्मदेहयोः प्रकाशतमसोरिवैक्यमैकात्म्यं
प्रपश्यंति तार्किकादय इत्यर्थः अतो विपरीतदर्शनात्परमन्यदज्ञानं किमस्ति
एतदेवाज्ञानमित्यर्थः विपर्ययरूपकार्यान्यथानुपपत्त्या तत्कारणं मूलाऽज्ञा
नं कल्प्यत इतिभावः १७ पुनर्वैलक्षण्यमाह आत्मेति आत्मा नियामको

आत्मानियामकश्चांत र्देहोबाह्योनियम्यकः तयोरै
क्यं १८ आत्माज्ञानमयःपुण्यो देहोमांसम-
योऽशुचिः तयोरैक्यं १९ ७

नियंता चपुनरंतः पंचकोशांतरः देहस्तुनियम्यः सन्बाह्यः तयोरैक्यमि
त्युत्तरार्द्धे व्याख्यातं एवमग्रेपि ज्ञेयं १८ अन्यदपि वैलक्षण्यमाह आ
त्मेति आत्मा ज्ञानमयः प्रकाशस्वरूपो ऽतएवपुण्यः शुद्धः देहस्तु मांसा ९
दि विकारवानतएवाऽशुचिः एतेनात्मनः स्थूलदेहादपि वैलक्षण्यमुक्तं

भवति तयोरैक्यमित्यादि पूर्ववत् १९ वैलक्षण्यांतरमाह आत्मेति आत्मा स्वयंप्रकाशः सन् सूर्यादिवदन्य सर्वप्रकाशको ऽतएवस्वच्छः प्रकाश्य गुणदोषसंबंधशून्यइत्यर्थः असंगोह्ययं पुरुष इतिश्रुतेः देहस्तु तामसो घटादिवत्प्रकाश्यत्वेन जडः तयोरैक्यमित्यादिपूर्ववत् २० अत्र सर्वत्र पौनरुक्त्यं नाशंकनीय मात्मनोऽलौकिकत्वेनात्यंतदुर्बोधत्वादेव बहुधावैलक्षण्यं

आत्माप्रकाशकःस्वच्छो देहस्तामसउच्यते त
योरैक्यं॰ २० आत्मानित्योहिसद्रूपो देहोऽ
नित्योह्यसन्मयः तयोरैक्यं॰ २१ ७

प्रदर्श्यते परमकारुणिकैःश्रीमदाचार्यैः आत्मेति आत्मा नित्यो ध्वंसाप्रतियोगी तन्नहेतुः हियस्मात्सद्रूपः अबाध्यस्वरूपः देहस्तु ध्वंसप्रतियोगी अबाधितहेतुः हियस्मादसन्मयी ऽनित्यः विकारित्वेन बाधयोग्यइत्यर्थः यस्मादेवमात्मदेहयोरत्यंतवैलक्षण्यं तस्मात्तयोरैक्यदर्शनं केवलमज्ञानमिति २१

नन्वात्मनः प्रकाशत्वं किंनामेत्यत आह आत्मनइति आत्मनस्तत् प्रकाशत्वं बोद्धव्यं किंतदित्यतआह यदिति यत्पदार्थावभासनं घटपटादिवस्तु विषयप्रकाश इदंतयानिर्दिश्यमान विषयदर्शनमितियावत् तत्सूर्य्यादि प्रकाशवद्विकारित्वं स्यादित्यतआह नाम्यादिदीप्तिवद्दीप्तिरिति इयमात्मदीप्तिरग्न्यादिदीप्तिवन्नकदाचिदुत्पत्तिविनाशादिविकारवतीत्यर्थः तत्रहेतुमा

आत्मनस्तत्प्रकाशत्वं यत्पदार्थोऽवभासनं
नाग्न्यादिदीप्तिवद्दीप्तिः भवत्यांध्यंयतोनिशि २२

भवतीति भवत्यांध्यं यतो निशि यतःकारणान्निशिरात्रावग्न्यादिप्रकाशए कस्मिन्देशेसत्यपि तदन्यत्रलोकस्यांध्यं रूपग्रहाक्षमत्वं भवति त्मदीप्तिरेकत्रविद्यमाना चैकत्राऽविद्यमाना परिच्छिन्ना वास्ति किंतु दीपादिरूपस्याग्न्यादिप्रकाशस्य प्रकाशिका तदभावेचांधकारस्य प्रकाशिका उत्पत्तिनाशरहिताच सदा सर्वत्रपूर्णैवास्ति यद्वा इयमात्मदीप्तिरग्न्यादि-

दीप्तिसदृशीन कुतः यतःकारणान्निशि रात्रावांध्यमंधकारोभवत्यतस्तद्दि
लक्षणाऽऽत्मदीप्तिर्ज्ञेया यद्यात्मदीप्तिरन्यादिदीप्तिसदृशीभवे त्तर्ह्यन्यादि
दीप्त्या यथांधकारस्य नाशोभवति तथात्मदीप्त्याऽप्यंधकारस्यनाशःस्या
त् परंत्वात्मनः सत्ताप्रकाशाभ्यां सर्वत्र सर्वदा विद्यमानत्वेऽप्यंधकारस्य
नाशो नभवत्यत आत्मदीप्तिरन्यादिदीप्तिसदृशी न किंतु इयमन्यादिदी

देहोहमित्ययंमूढो धृत्वातिष्ठत्यहोजनः
ममायमित्यपिज्ञात्वा घटद्रष्टेवसर्वदा २३

प्तिर्भानोदमांध्यंभातीत्याद्याकारेणाऽऽन्यादिदीप्तेरांध्यस्य चान्यस्य सर्वस्य च
प्रकाशिका चाविरोधिन्यात्मदीप्तिः स्वप्रकाशेवाभ्युपेतव्या सैवैरात्मज्ञानारूढैरित्य
र्थः तस्मादन्यादिदीप्तीनामपिदीपिका ऽन्यसाधननिरपेक्षा या दीप्तिः स आत्म
प्रकाश इतिभावः २२ नदेवं प्रकाश्य प्रकाशकत्वादिलक्षणवैलक्षण्येसत्यपि आ
त्मानात्माभेददर्शिनमुपसंहरन्नुभयोर्भेदं स्पष्टयति देहइति अहमहंशब्दम

त्ययालंबनः प्रत्यगाऽऽत्मा ऽयमिदंतयानिर्दिश्यमानो घटादिवत्प्रत्यक्षतया दृश्यमानो देहोस्मीति उभयोर्दृष्टदृश्ययोरैक्यंकृत्वा मूढःस्वा ज्ञानकार्यविपर्ययमोहव्यातो जनस्तिष्ठति कृतकृत्यबुद्ध्या निर्व्यापारोभवतीत्यर्थः एतदहो महदज्ञानमितिभावः किंकृत्वापीत्यतआह ममेति मम मत्संबंधी अयं देह इति सामान्यतो भेदंज्ञात्वापि अतएवाश्चर्यमिति तात्पर्यं कश्चि सर्वदा

ब्रह्मैवाहंसमःशांतः सच्चिदानंदलक्षणः
नाहंदेहोद्यसद्रूपो ज्ञानमित्युच्यतेबुधैः २४

घटद्रष्टेव यथा सर्वकाले घटद्रष्टा पुरुषो ममायंघटइति जानाति नत्वहंघट इति कदाचिदपि जानातीत्यर्थः २३ नन्वतस्मिंस्तद्बुद्धिरिति लक्षणमापरपर्याय मोहकार्यलिंगानुमेयमज्ञानमीदृक् तर्हि तन्निवर्तकं किमित्याकांक्षायां नहिरोधित्वादात्मज्ञानमेवात्माऽज्ञाननिवर्तकमित्यभिप्रेत्य तल्लक्षणमाह ब्रह्मेत्यादिपंचभिः अहमहंशब्दप्रत्ययालंबनः प्रत्यगात्मा ब्रह्मैवास्मि

एतयोस्तत्त्वंपदार्थयोरैक्ये हेतुगर्भितानि विशेषणान्याह समइति समः स
त्ताप्रकाशाभ्यां सर्वास्मिन्नः पुनः किंलक्षणः शांतः निरस्तसमस्तोपाधित्वा
द्विक्षेपादिविकारशून्यः पुनः किंलक्षणः सच्चिदानंदलक्षणः सच्चिदानंदैर
नृतजडदुःखप्रतियोगिभिर्लक्ष्यते विरुद्धांशत्यागरूपया भागलक्षणयाज्ञा
यत इतिसच्चिदानंदलक्षणः ब्रह्मबोधे हि द्विविधंद्वारं विधिर्निषेधश्चेति
तत्र सत्यज्ञानादिसाक्षाद्वाचकशब्दप्रयोगलक्षणो विधिरुक्तः इदानी
मतन्निरसनलक्षणो निषेधः प्रदर्श्यते नाहमिति अहमहंशब्दप्रत्य
यालंबनःदेहो नेत्यन्वयः देहइत्युपलक्षणं प्राणेंद्रियादीनामपि हीति
विद्वज्जनप्रसिद्धं देहादेरनात्मत्वेहेतुमाह असदिति असद्रूपो ऽसत्-
बाध्य मनृतंनाद्रूपं स्वरूपं यस्य सनथाविधः इत्येवंप्रकारमहंब्रह्मा
स्मीत्यादिमहावाक्यजन्या ऽखंडाकारबुद्धिरूपंज्ञानं बुधैरात्मतत्त्वज्ञैरुच्यते
कथ्यतइत्यर्थः एतद्विलक्षणः सर्वो ज्ञानाभासइतिभावः २४

त्ययालंबनः प्रत्यगाऽऽत्मा ऽयमिदंतयानिर्दिश्यमानो घटादिवत्प्रत्यक्षतया दृश्यमाने देहोस्मीति उभयोर्दृष्टदृश्ययोरैक्यंकृत्वा मूढःस्वा ज्ञानकार्यविपर्ययमोहव्याप्तो जनस्तिष्ठति कृतकृत्यबुद्ध्या निर्व्यापारोभवतीत्यर्थः एतद्हो महदज्ञानमितिभावः किंकृत्वापीत्यतआह ममेति मम मत्संबंधी अयं देह इति सामान्यतो भेदंज्ञात्वापि अतएवाश्चर्यमिति तात्पर्यं कइव सर्वदा

ब्रह्मैवाहंसमःशांतः सच्चिदानंदलक्षणः
नाहंदेहोद्यसद्रूपो ज्ञानमित्युच्यतेबुधैः २४

घटद्रष्टेव यथा सर्वकाले घटद्रष्टा पुरुषो ममायंघटइति जानाति नत्वहंघट इति कदाचिदपि जानातीत्यर्थः २३ नन्वतस्मिंस्तद्बुद्धिरिति लक्षणफमापर पर्याय मोहकार्यलिंगानुमेयमज्ञानमीदृक् तर्हि तन्निवर्तकं किमित्याकांक्षायां तद्विरोधित्वादात्मज्ञानमेवात्माऽज्ञाननिवर्तकमित्यभिप्रेत्य तल्लक्षणमाह ब्रह्मेत्यादिपंचभिः अहमहंशब्दप्रत्ययालंबनः प्रत्यगात्मा ब्रह्मैवास्मि

एतयोस्तत्त्वंपदार्थयोरैक्ये हेतुगर्भितानि विशेषणान्याह समइति समः स
त्ताप्रकाशाभ्यां सर्वाभिन्नः पुनः किंलक्षणः शांतः निरस्तसमस्तोपाधित्वा
द्विक्षेपादिविकारशून्यः पुनः किंलक्षणः सच्चिदानंदलक्षणः सच्चिदानंदैर
नृतजडदुःखप्रतियोगिभिर्लक्ष्यते विरुद्धांशत्यागरूपया भागलक्षणयाज्ञा
यत इतिसच्चिदानंदलक्षणः ब्रह्मबोधे हि द्विविधंद्वारं विधिर्निषेधश्चेति
तत्र सत्यज्ञानादिसाक्षाद्वाचकशब्दप्रयोगलक्षणो विधिरुक्तः इदानी
मतन्निरसनलक्षणो निषेधः प्रदर्श्यते नाहमिति अहमहंशब्दप्रत्य
यालंबनःदेहो नेत्यन्वयः देहइत्युपलक्षणं प्राणेंद्रियादीनामपि हीति
विद्वज्जनप्रसिद्धं देहादेरनात्मत्वेहेतुमाह असदिति असद्रूपो ऽसन् -
बाध्य मनृतंनाद्यूपं स्वरूपं यस्य सतथाविधः इत्येवंप्रकारमहंब्रह्मा
स्मीत्यादिमहावाक्यजन्या ऽखंडाकारबुद्धिरूपंज्ञानं बुधैरात्मतत्वज्ञैरुच्यते
कथ्यतइत्यर्थः एतद्विलक्षणः सर्वो ज्ञानाभासइतिभावः २४

त्यत्रालंबनः प्रत्यगाऽऽत्मा ऽयमिदंतयानिर्दिश्यमानो घटादिवत्प्रत्यक्षतया दृश्यमानो देहोस्मीति उभयोर्दृष्टृदृश्ययोरैक्यंकृत्वा मूढःस्वा ज्ञानकार्यविपर्ययमोहव्यातो जनस्तिष्ठति कृतकृत्यबुद्ध्या निर्व्यापारोभवतीत्यर्थः एतद्हो महदज्ञानमितिभावः किंकृत्वापीत्यतआह ममेति मम मत्संबंधी अयं देह इति सामान्यतो भेदंज्ञात्वापि अतएवाश्चर्यमिति तात्पर्ये कइव सर्वदा

ब्रह्मैवाहंसमःशांतः सच्चिदानंदलक्षणः
नाहंदेहोह्यसद्रूपो ज्ञानमित्युच्यतेबुधैः २४

घटद्रष्टेव यथा सर्वकाले घटद्रष्टा पुरुषो ममायंघटइति जानाति नत्वहंघट इति कदाचिदपि जानातीत्यर्थः २३ नन्वतस्मिंस्तद्बुद्धिरिति लक्षणफ्रमापरपर्याय मोहकार्यलिंगानुमेयमज्ञानमीदृक् नहि तन्निवर्तकं किमित्याकांक्षायां तद्विरोधित्वादात्मज्ञानमेवात्माऽज्ञाननिवर्तकमित्यभिप्रेत्य तल्लक्षणमाह ब्रह्मेत्यादिपंचभिः अहमहंशब्दप्रत्ययालंबनः प्रत्यगात्मा ब्रह्मैवास्मि

पुनःकिंलक्षणंज्ञानमित्यतआह निरामयइति अहं निरामयः सर्वरोगरहि
तः निराभासो वृत्तिव्याप्यत्वेपि फलव्याप्यत्वशून्यः निर्विकल्पः कल्पनाही
नः आतनश्च व्यापकः २६ पुनःकिंलक्षणं ज्ञानमित्यतआह निर्गुणइति
अहंनिर्गुणो गुणरहितः गुणानांमायामयत्वादित्यर्थः अतएव निष्क्रियः

निरामयोनिराभासो निर्विकल्पोहमाततः नाहं
देहो० २६ निर्गुणोनिष्क्रियोनित्यो नित्य
मुक्तोहमच्युतः नाहंदेहो० २७ निर्मलोनिश्च
लोननः शुद्धोहमजरोमरः नाहंदेहो० २८

क्रियारहितः तथानित्यो विनाशरहितः अतएव नित्यमुक्तः कालत्रयेपि
बंधशून्यः तत्रहेतुः अच्युतः अप्रच्युतसच्चिदानंदस्वभावः २७ पुनरपि
ज्ञानलक्षणमाह निर्मलइति अहं निर्मलः अविद्या तत्कार्यलक्षण म-
लरहितः अतएव निश्चलः व्यापकत्वादाकाशवन्निश्चलइत्यर्थः निश्चल

त्वे हेतुः अनंतः देशकालवस्तुपरिच्छेदशून्यः शुद्धः अशुद्धिरहितः पु नर्जरः जरारहितः अमरो मरणरहितश्च सर्वधर्माणां देहत्रयवर्त्तित्वा दिनिभावः २८ नन्वात्मा प्रत्यक्षदेहरूपो नभवति नहि शून्यत्वमात्मनः स्यादित्याशंक्याह स्वदेहे इति भो हेमूर्ख शून्यवादिन् स्वदेहे पुरुषाख्यं पुरि मनुष्यशरीरे उषति अहमाकारेण वसतीतिपुरुष इत्याख्यानामय

स्वदेहेशोभनंसंतं पुरुषाख्यंचसंमतं
किंमूर्खंशून्यमात्मानं देहातीतंकरोषिभो २९

स्य तं अतएव शोभनं मंगलं शरीरविलक्षणत्वादतिमंगलं तथा संम तं अयमात्माब्रह्मेत्यादिवाक्यनिर्णीतं चकारादुत्तमःपुरुषस्त्वन्य इत्या दि स्मृतिनिर्णीतं घटद्रष्टृवद्देहद्रष्टृत्वेन देहातीतमात्मानं सतनंभावंस तं सर्वव्यवहाराधिष्ठानं शून्यं खपुष्पादिवत् अत्यंताऽभावरूपं किं करोषि कथंमन्यसे मामन्यथाइतिभावः क्वचित्स्वदेहमितिद्वितीयांतः

पाठस्तस्मिन्पक्षे देहात्मवाद्येव वदति उक्तलक्षणं मनुष्यदेहं त्यक्त्वा स
मानमन्यत् २९ ननु शून्यवादिन एवाभावापत्तेः शून्यमास्तु परंत्वात्म
नो देहातीतत्वे प्रमाणाभावाद्देह एवात्मास्त्वादित्याशंक्याह स्वात्मान-
मिति भोमूर्ख देहात्मवादिन् चार्वाक त्वं स्वात्मानं स्वकीयमात्मानं पुरु
षं देहातीतं देहातिरिक्तं श्रुत्या तस्माद्वा एतस्मादन्नरसमयादन्योंतर

स्वात्मानंशृणुमूर्खत्वं श्रुत्यायुक्त्याचपूरुषं
देहातीतंसदाकारं स्फुटदृशैमवादृशैः ३०

आत्मेत्यादिकया पुनर्युक्त्याच एकस्मिन्कर्तृकर्मविरोध इत्यादिरूपया शृ
णु अवधारय देहातीतत्वे किमाकार आत्मेत्यतआह सदाकारमिति सदा-
कारमस्तीत्येतन्मात्रव्यवहारकारणभूत आकारोयस्य तं एवंविधोस्त्रिचक्षु
षोनदृश्यतइत्यतआह स्फुटदृशैमिति भवादृशैः श्रुत्याचार्यैश्चक्षुष्मद्भिः सु
दुर्दृशैं सर्वथादर्शनायोग्यं तस्यद्रष्टृरूपत्वादेवेत्यर्थः यद्वा पूर्वश्लोकोक्त

द्वितीयापेक्षया देहात्मवादिनः समाधानार्थोयंश्लोकः स्वात्मानमिति ३०
तदेवाह अहमित्यादिसप्तभिः परः देहादन्यआत्मा ऽहंशब्देन शब्दइत्यु
पलक्षणं प्रत्ययस्यापि विख्यातः प्रसिद्धः किंलक्षण इत्यतआह एकई
एकएवस्थित एवेतिप्रत्येकमवधारणं नुशब्दः पूर्वोक्तादात्मनः स्थूलदे
हस्यंवैलक्षण्यद्योतकः स्थूलोदेहकः देहएवदेहकः स्वार्थिकःप्रत्ययः -

अहंशब्देनविख्यात एकएवस्थितःपरः
स्थूलस्त्वनेकतांप्राप्तः कथंस्याद्देहकःपुमान् ३१

कथंपुमान् पुरुषः आत्मास्यान्नकथंचिदित्यर्थः देहस्यानात्मत्वेहेतु-
माह अनेकतामिति अनेकतां परस्परं भिन्नतां प्राप्तः एवं तमः
शवदतिविलक्षणत्वेपि देहस्यात्मत्वंब्रुवन्नतिमूढत्वादुपेक्ष्यइति-
भावः ३१ ७ श्रीसच्चिदानंदायनमः ७

न्देवातिवैलक्षण्यं दर्शयति अहमिति अहमहंशब्दप्रत्ययालंबन आत्मा
द्रष्टतया शब्दादिविषयंप्रकाशकतया सिन्हः शब्दंशृणोमीत्यादिव्यवहारे
णप्रसिन्हः देहस्तु दृश्यतया शब्दादिवत्प्रकाश्यतयास्थितः तत्रहेतुमा
ह ममेति ममायंदेह इति घटादिवत्स्वीयसंबंधितया निर्देशात् व्यव-
हारात् एवमुभयोर्वैलक्षण्येसति कथं देहकःपुमान् स्यादितिव्याख्याता

अहंद्रष्टृतयासिद्धो देहोदृश्यतयास्थितः ममाय
मितिनिर्देशा त्स्वर्थ॰ ३२ अहंविकारहीनस्तु दे-
होनित्यंविकारवान् इतिप्रतीयतेसाक्षा त्स्वर्थ॰ ३३

र्थश्चतुर्थपादः एवमग्नेपिवोन्हव्यं ३२ पुनर्वैलक्षण्यांतरमाह अहमिति अ
हंव्याख्यातार्थः विकारहीनः जायतेस्तीत्यादिषड्विकारहीनः तुवैलक्षण्ये
देहो नित्यं सर्वकालं विकारवान् अत्रकिंप्रमाणमतआह इतीति इति साक्षात्
प्रत्यक्षप्रमाणेन प्रतीयतेअनुभूयते एवंसतिकथंस्यादेहकःपुमानिति ३३

एवं युक्त्या देहात्मनोर्वैलक्षण्यमुक्त्वा श्रुत्याप्याह यस्मादिति यस्मात्परं नापरमस्तिकिंचिद्यस्मान्नाणीयो न ज्यायोस्ति कश्चित् वृक्षइव स्तब्धो दिविनिष्टत्येकस्तेनेदं पूर्णं पुरुषेणसर्वमिति तया मसिन्द्रया तैत्तिरीयश्रुत्या कृत्येतिकरणेतृतीया पुरुषस्यात्मनोलक्षणं विमूढेन विगतमूढभावेनातिचतुरेण श्रुत्यर्थविवेचनकुशलेनेत्यर्थः इयं कर्त्तरितृतीया विनि

यस्मात्परमितिश्रुत्या नयापुरुषलक्षणं विनिर्णी
तंविमूढेन कथं० ३४ सर्वंपुरुषएवेति सूक्तेपुरु
षसंज्ञिते अप्युच्यतेयतःश्रुत्या कथं० ३५

र्णीतं विचार्यस्थापितं अन्यत्पूर्ववत् यद्वा श्रुत्येतिकर्तृपदमस्मिन्पक्षेविमूढेनेतिदेहात्मवादिनंप्रतिसंबोधनं विमूढानांइनस्वामिन् मूर्खशिरोमणित्वादेव श्रुतिनाद्रियसइतिभावः ३४ नकेवलमनयैकया श्रुत्या विनिर्णीतं किंत्वन्ययापीत्याह सर्वमिति यतोहेतोः श्रुत्या वेदास्व्यपरदेवतया पुरुषएवे

दंसर्वमिति पुरुषसंज्ञिते सूक्तेप्युच्यते पुरुषलक्षणामिति पूर्वश्लोकादध्या
हारः अतःकथंस्यादितिपूर्ववत् ३५ अपरयापि श्रुत्यैवमेवनिर्णीतमि
त्याह असंगइति असंगोह्ययंपुरुषइतिश्रुत्या बृहदारण्यके बाजसने-
योपनिषदि पुरुषः असंगः प्रोक्तः देहकस्त्वनंतमूलसंश्लिष्टः कथंपुमा
न्स्यादिति ३६ तत्रैवान्यप्रकारेणापि देहात्मनोर्वैलक्षण्यंनिरूपितमि

असंगःपुरुषःप्रोक्तो बृहदारण्यकेऽपिच अनंत
मूलसंश्लिष्टः कथं॰ ३६ तत्रैवचसमारब्धातः स्व
यंज्योतिर्हिपूरुषः जडःपरप्रकाश्योसौ कथं॰ ३७

त्याह तत्रैवेति तत्रैव बृहदारण्यक एवेत्यर्थः अत्रायं पुरुषः स्वयंज्योति-
र्भवतीति श्रुत्या स्वयंज्योतिः पुरुषः समारब्धानः हीतिविद्वत्प्रसिद्धिं
द्योतयति असौ घटादिर्वद्दृश्यो ऽतएवपरप्रकाश्यस्ततएव जडोदेहकः
कथंपुमान्स्यादितिव्याख्यातं ३७

अथास्तामिदं ज्ञानकांडं कर्मकांडेपि देहात्मनोर्भेद एवनिर्णीत इत्याह मो
क्तइति द्वियस्मात्कर्मकांडेनापि यावज्जीवमग्निहोत्रं जुहुयादित्यादिरूपेण
कर्ममतिपादकेन वेदभागेनेत्यर्थः आत्मा देहादिलक्षणः प्रोक्तः कथमि
त्यतआह नित्यइति.नित्यत्वंच कुतइत्यतआह तदिति देहपात ॥ ८ ॥

प्रोक्तोऽपिकर्मकांडेन ह्यात्मादेहादिलक्षणः
नित्यश्चतत्फलंभुंक्ते देहपातादनंतरं ३८
लिंगंचानेकसंयुक्तं चलद्दृश्यधिकारिच
अव्यापकमसद्रूपं तत्कथंस्यात्पुमानयं ३९

तत्फलमनित्यंकर्मफलं यतः आत्मा भुंक्तेऽतोनित्यइत्यर्थः चकारात् न्या
यसांख्यादावप्येवमेवदेहात्मनोर्भेदोवर्णितइतिदर्शितं ३८ नन्वेवंसति
वेदांतिनामपसिद्धांतः स्यादित्यतआह लिंगमिति लिंगं लिंगशरीरं तत्परो
क्षादिधर्मविशिष्टं अयं नित्यापरोक्षस्वभावः पुमान् कथंस्यान्नकथंचि

दित्यर्थः चकारात्कारणशरीरमपि निराकृतं अनयोरपिभेदे लिंगदेहस्य वैलक्षण्यसूचकानिविशेषणान्याह अनेकेति अनेकसंयुक्तं देवमनुष्यादि-नानास्थूलशरीरसंबंधयुक्तं यद्वा श्रोत्रादिबुद्धंतसप्तदशकलासंयुक्तं तथा चलं चंचलं मनःप्रधानत्वादित्यर्थः पुनर्दृश्यं ममेदं श्रोत्रं ममेदं मन इत्यादि ममनास्पदत्वेनात्मन उपसर्जनभूतं चपुनर्विकारि उपचयादिमत् अव्यापकं

एवंदेहद्वयादन्य आत्मापुरुषईश्वरः
सर्वात्मासर्वरूपश्च सर्वातीतोहमव्ययः ४०

परिच्छिन्नमसद्रूपमात्मज्ञानैकबाध्यंच अभेदमाकूतं यद्यपि लिंगशरीरा ध्यासेनात्मनः कर्तृत्वभोक्तृत्वादिभाव स्तथाप्यात्मनः स्वतस्तदभावज्ञा-नेना ऽध्यासनिवृत्तावकर्तृत्वाभोक्तृत्वादिभावसिद्धिरिति वेदांतिनां न किं-चिदप्रसिद्धांतोन्यवदिति मंगलं २९ इदानीं पूर्वोक्तमर्थमुपसंहरति एवमि-ति एवं पूर्वोक्तप्रकारेण देहद्वयात् स्थूलसूक्ष्मलक्षणादन्योभिन्न आत्मा

कोसावित्यतआह पुरुषइति पुरुषः शरीराधिष्ठाता तर्हि किंजीवः नेत्या ह ईश्वर इति तत्रहेतुः सर्वात्मेति तर्ह्यद्वैतहानिः स्यादित्यतआह सर्वरूप इति एवंसति विकारित्वंस्यादित्यतआह सर्वातीत इति एतादृश आत्मा चेदस्ति तर्हि कुतोनोपलभ्यत इत्यतआह अहमिति अहं प्रत्यक्षो ऽहंशब्द प्रत्ययालंबनत्वेन सर्वदोपलब्धिस्वरूप इत्यर्थः तर्ह्यहंकारः स्यान्नेत्याह

इत्यात्मदेहभागेन प्रपंचस्यैवसत्यता
यथोक्तानर्कशास्त्रेण ततःकिंपुरुषार्थता ४१

अव्ययइति अव्ययः अपक्षयादिविकारशून्यः अहंकारसाक्षीति भावः ४० अथेदानीमात्मनो देहद्व्यातिरिक्तत्व प्रतिपादनमनर्थकमितिशकते इतीति इति पूर्वोक्तप्रकारेण वर्णितेनात्मदेहविभागेन प्रपंचस्यैव सत्यता तथोक्ता यथा तर्कशास्त्रेण ततः प्रपंचसत्यत्वप्रतिपादनात्किंपुरुषार्थता कुत्सितपुरुषार्थत्वं भयनिवृत्त्यभावादित्यर्थः द्वितीयाद्वैभयं भवतीतिश्रुतेः ४१

भेदज्ञानस्याभेदज्ञानंभवति कारणत्वादात्मदेहविभागकथनं नानर्थकमित्याह इतीति इति पूर्वोक्तेनात्मदेहभेदेनात्मनो देहात्पृथक्करणेन देहस्यैव मा
त्त चार्वाकमतेनात्मत्वं तन्निवारितं इदानीमुत्तरग्रंथेन तस्य देहभेदस्या-
सत्त्वमात्मसत्तातिरिक्तसत्ताराहित्यं स्फुटं स्पष्टंयथास्यात्तथा हीतिप्रसिद्ध

इत्यात्मदेहभेदेन देहात्मत्वंनिवारितं
इदानींदेहभेदस्य ह्यसत्त्वंस्फुटमुच्यते ४२
चैतन्यस्यैकरूपत्वा द्भेदोयुक्तोनकर्हिचित्
जीवत्वंचमृषाज्ञेयं रज्जौसर्पग्रहोयथा ४३

मुच्यते ४२ तदेवाह चैतन्यस्येति चैतन्यस्य सर्वभूतभौतिकप्रपंचाधिष्ठान
प्रकाशस्य घटःप्रकाशते पटःप्रकाशते इत्यादिष्वेकरूपत्वादेकाकारत्वा-
द्धेतोः कर्हिचित् कस्यांचिदवस्थायामपि भेदो नयुक्तो नयथार्थइत्यर्थः न
हिजीवभेदः सत्यःस्यादित्यतआह जीवत्वमिति जीवत्वं चकारोप्यर्थः

मृषा मिथ्या ज्ञेयं तदुपाधेरेवांतःकरणादेर्मायामयत्वादित्यर्थः अधिष्ठानसत्यत्वेन कल्पितस्य मिथ्यात्वबोधे दृष्टांतमाह रज्जाविति यथा रज्जौ तदज्ञानात् वक्रतादिसादृश्येन मंदांधकारे सर्पग्रहः सर्पबुद्धिरज्ञस्य भवति नतु व्युत्पन्नस्य तथैवात्मन्यात्माज्ञानात् प्रकाशसादृश्यादविशेषप्रकाशे सिज्जडग्रंथिरूपचिदाभासत्रमो भवत्यविवेकिनां नतु

रज्ज्वज्ञानात्क्षणेनैव यद्वद्रज्जुर्हिसर्पिणी
भातितद्वच्चितिःसाक्षा द्विश्वाकारेणकेवला ४४

विवेकिनामिति वेदांतसिद्धांतरहस्यं ४३ इदानीं पूर्वोक्तमेव दृष्टांतं विवृण्वन् सर्वस्यापिप्रपंचस्य ब्रह्मरूपतामाह रज्ज्विति केवलेति विशेषणेन पूर्वावस्थामपरित्यज्यावस्थांतरप्राप्तिलक्षणविवर्त्तोपादानत्वमेवोक्तं नारंभोपादानत्वं नापि परिणामोपादानत्वमितिबोध्यं अन्यत्स्पष्टम् ४४ ॐ श्रीसच्चिदानंदायनमः ॐ

अत्र हेतुं दर्शयन् पूर्वोक्तमुपसंहरति उपादानमिति यस्मात्प्रपंचस्याकाशादिदेहांतस्य जगद्विस्तारस्य ब्रह्मणो मायाशबलाच्चैतन्यादन्यत्परमाणावो यद्वा प्रकृतिरूपादानं कारणविशेषो नविद्यतइति तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिश्रुतेः तस्मान्हेतोरिति स्पष्टमन्यत्

उपादानंप्रपंचस्य ब्रह्मणोन्यन्नविद्यते
तस्मात्सर्वप्रपंचोयं ब्रह्मैवास्तिनचेतरत् ४५
व्याप्यव्यापकतामिथ्या सर्वमात्मेतिशासनात्
इतिज्ञातेपरेतत्त्वे भेदस्यावसरःकुतः ४६

४५ ननु व्याप्यव्यापकतारूपे भेदे जायतिसति कथं प्रपंचस्य ब्रह्मतेत्याशंक्याह व्याप्येति व्याप्यमांतरं व्यापकंबाह्यं तयोर्भावो मिथ्या घटाकाशादिवत् कल्पितत्वादसन्नित्यर्थः तत्रप्रमाणमाह सर्वमिति इदं ब्रह्मेदंसत्यमिति प्रकृत्येदंसर्वंयदयमात्मेत्यादि श्रुतिरूपेश्वराज्ञावला

दित्यर्थः ततःकिमतआह इतीति इतिज्ञातेत्यादिस्फुटम् ४६ ननु म त्यक्षेणप्रासमानो व्याप्यव्यापकभावः कथंमिथ्येत्याशंक्याह श्रुत्येति नूनमिति निश्चये हीतिमंसिन्द्रो श्रुत्या नेहनानास्ति किंचनेत्यादिरूपये त्यर्थः नानात्वं निवारितं तेनच नानात्वनिवारणेनाद्वयकारणे ऽभिन्न

श्रुत्यानिवारितंनूनं नानात्वंस्वमुखेनहि
कथंभासोभवेदन्यः स्थितेचाद्वयकारणे ४७
दोषोपिविहितःश्रुत्या मृत्योर्मृत्युंसगच्छति
इहपश्यतिनानात्वं माययावंचितोनरः ४८

निर्मिन्नोपादाने ब्रह्मणि स्थितेसति भासो व्याप्यव्यापकतादिप्रतिभासः कार्यभूतो ऽन्यःस्वकारणातिरिक्तः कथंभवेन्नकथंचिदित्यर्थः ४७ किंच भेददृष्टेर्दोषश्रवणादपि कारणादभिन्नमेव कार्यमित्याह दोषइति मृ त्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्यादिरूपया श्रुत्येत्यर्थः

नन्व मृत्योरनंतरं मृत्युं जननमरणपरंपरामित्यर्थः स्पष्टमन्यत् ४८
तर्हि किंकुर्यादित्यतआह ब्रह्मणइति बृहत्त्वादपरिच्छिन्नत्वाद्ब्रह्म तद्
परात्परमात्मनः सर्वाणि भूतानि जायंते उत्पद्यंते जायंतइति स्थितिमल
ययोरप्युपलक्षणं यतोवा इमानि भूतानि जायंत इत्यादिश्रुतेः यस्मादेवं

ब्रह्मणःसर्वभूतानि जायंतेपरमात्मनः
तस्मादेतानिब्रह्मैव भवंतीत्यवधारयेत् ४९
ब्रह्मैवसर्वनामानि रूपाणिविविधानिच
कर्माण्यपिसमग्राणि बिभर्तीतिश्रुतिर्जगौ ५०

तस्माद्धेतोरेतानि भूतानि ब्रह्मैव भवंति सन्मात्रब्रह्मरूपाणीत्यवधारयेन्नि
श्चिनुयादिति ४९ ननु नाना नामरूपकर्मभेदेन विचित्राणि भूतानि क
थं ब्रह्मात्मकानीत्याशंक्याह ब्रह्मैवेति वयंवा इदं नाम रूपं कर्मेतिबृ
हदारण्यकश्रुतिर्जगौ गायनं कृतवती स्वाधिकारिणः श्रावयामासेत्य

थैः किमित्यतआह ब्रह्मेव सर्वनामान्याकाशादिदेहांतान् न चपुनर्विविधानिरूपाण्यवकाशादि द्विपदांतान् नानाविकारविशेषान् अपिशब्दश्चार्थे रूपग्रहणं गंधादिग्रहणस्याप्युपलक्षणं समग्राणि कर्माण्यवकाशप्रदानादीनि स्नानशौचादीन् क्रियाविशेषानपि बिभर्त्ति

सुवर्णाज्जायमानस्य सुवर्णत्वंचशाश्वतं
ब्रह्मणोजायमानस्य ब्रह्मत्वंचनथाभवेत् ५१
स्वल्पमप्यंतरंकृत्वा जीवात्मपरमात्मनोः
यःसंतिष्ठतिमूढात्मा भयंतस्याभिभाषितं ५२

रज्ज्वादिकमिव सर्पादि प्रतिभासं दधात्यधिष्ठानदर्शनशून्यान् प्रतिदर्शयतीत्यर्थः ५० अत्र लोकप्रसिद्धं दृष्टांतमाह सुवर्णेति सुगमं ५१ एवं कर्तृकर्मादि कारकषट्कस्यैकाधिष्ठानरूपत्वे सिद्धेपि भेददर्शिनो भयमाह स्वल्पमप्यंतरमुपास्योपासकरूपं भेदं कृत्वा कल्पयित्वायस्तिष्ठति

तस्य भयंभाषितं यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीत्यादिश्रुत्येत्यर्थः' ५२ ननु प्रकाशतमसोरिव परस्पर विरुद्धस्वभावयोर्द्वैताद्वैतयोः कुत एकाधिकरणत्वमित्याशंक्यावस्थाभेदादित्याह यत्रेति यत्र यस्यामज्ञानावस्थायां अज्ञानेन द्वैतमिव भवे तत्र तस्यामज्ञानावस्थायामितरोऽन्योऽन्यत्पश्यति यत्रहि द्वैतमिव भवति त

यत्राज्ञानाद्भवेद्वैत मितरस्तत्रपश्यति
आत्मत्वेनयदासर्वं नेतरस्तत्रचाणवपि ५३

दितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरं शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानातीति यत्र वा ऽन्यदिवस्या त्तत्रान्योन्यत्पश्येदन्योन्यज्जिघ्रेदन्योऽन्यद्रसयेदित्यादिश्रुतेः चशब्दः पूर्वोक्तद्वैलक्षण्यं सूचयति यदा यस्मिन् ज्ञानकाले सर्वमात्मत्वेन भवेत् तत्र तस्मिन् ज्ञानकाले इतरोऽएवपि किंचिदप्यन्यन्न

पश्यति यत्रवा अस्य सर्वमात्मैवाभूत्तत्केनकं पश्येत्तत्केनकं जिघ्रेद्दि त्यादिश्रुतेः सकार्याज्ञाननिवृत्त्या नहैतमितिभावः ५३ ननु हैतादृशो मे कः पुरुषार्थ इत्याशंक्य तन्निपादिकां यस्मिन्सर्वाणि भूतान्या त्मैवाभूद्विजानतः तत्र कोमोहः कःशोक एकत्वमनुपश्यत इतिश्रुति मर्थतः पठति यस्मिन्निति यस्मिन्नवस्थाविशेषे सर्वाणि भूतान्या

यस्मिन्सर्वाणिभूतानि त्यात्मत्वेनविजानतः
नवैतस्यभवेन्मोहो नचशोकोऽद्वितीयतः ५४

त्मत्वेनात्मभावेन विजानतः अपरोक्षेण साक्षात्कुर्वतो ऽधिकारिणः पुरुषस्य तस्येतिषष्ठी सप्तम्यर्थे तस्मिन्नवस्थाविशेषे वैनिश्चयेन मो हो भ्रमोनभवे च्चपुनः शोको व्याकुलतापि नभवेत् उभयत्रहेतुः अद्वि तीयतः तत्कारणाभावादित्यर्थः ५४

शोककारण द्वैताभावे प्रमाणमाह अयमिति सर्वा अयमात्मा ब्रह्म विज्ञानमय इत्यादिरूपयेत्यर्थः शेषंस्पष्टं ५५ नन्वयंलोक एव तत्कारणे सति कथं शोकाद्यभाव उच्यत इत्याशंक्य सदृष्टांतमाह अनुभूत

अयमात्माहिब्रह्मैव सर्वात्मकतयास्थितः
इतिनिर्द्धारितश्रुत्या बृहदारण्यसंस्थया ५५
अनुभूतोऽप्ययंलोको व्यवहारक्षमोऽपिसन्
असद्रूपोयथास्वप्न उत्तरक्षणबाधतः ५६
स्वप्नोजागरणेऽलीकः स्वप्नेऽपिजागरोनहि
ह्ययमेवलयेनास्ति लयोपिह्युभयोर्नच ५७

इति स्पष्टं ५६ दृष्टांते विवृण्वन्नुक्तन्यायमन्यत्राप्यतिदिशति स्वप्नइति अलीको मिथ्या ह्ययं स्वप्नजागरणे लये सुषुप्तौ शेषंस्पष्टम् ५७

उक्तमुपसंहरन्कल्पितमाह त्रयमिति त्रयं जाग्रदाद्यवस्थात्रय मेवमुक्तपर
म्परव्यभिचारेण मिथ्या मिथ्यात्वेहेतुः गुणेति गुणत्रयविनिर्मितं मा-
यात्कल्पितमित्यर्थः तर्हि किंसत्यमतआह अस्येति अस्य अवस्थात्रय
स्य शेषंस्पष्टं ५८ नन्ववस्थात्रयं मिथ्याभवतु जीवस्तु सत्यः स्यादि-

त्रयमेवंभवेन्मिथ्या गुणत्रयविनिर्मितं अस्यद्रष्टागु
णातीतो. नित्योह्येकश्चिदात्मकः ५८ यद्वन्मृदि घ
टत्वांतिं शुक्तौवारजतस्थितिं तद्वद्ब्रह्मणिजीवत्वं
वीक्ष्यमाणेनपश्यति ५९ यथामृदिघटोनाम कनकेकुं
डलाभिधा शुक्तौहिरजतख्याति र्जीवशब्दस्तथापरे ६०

त्याशंक्य सदृष्टांतमुत्तरमाह यद्वदिति ब्रह्मणि वीक्ष्यमाणे आत्मत्वेन
साक्षात्कृते सति जीवत्वं नपश्यतीत्यन्वयः अन्यत्स्पष्टमेव ५९ अज्ञानाव
स्थायां प्रतीयमानो यो जीवब्रह्मभेदः सनाममात्र इति यद्दृष्टांतेराह यथेति र

ज्ञानस्य ख्यातिराख्या नामेतियावत् परे परेब्रह्मणि जीवशब्दस्तथा शेषंस्पष्टं ६० नकेवलं जीव एवनाममात्रः किंतु सर्वविश्वमपि ब्रह्मणि नाममात्रमित्यनेकदृष्टांतैराह यथैवेति स्पष्टं ६१ नाममात्रप्रपंचस्य मिथ्यात्ववासनादाढ्यायेममेवार्थं बहुभिर्लोकप्रसिद्धदृष्टांतैः प्रपंचयति यथैवशून्य इत्यादिभिः शून्ये निर्जनेदेशे वैतालः अकस्मादाभासमानो भूतविशेषः गंधर्वपुरस्यापि शून्याधिष्ठानत्वं ज्ञेयं गंधर्वनगरंनाम राजनगराकारो नीलपीतादि मेघरचनाविशेषः स्पष्टमन्यत् ६२ यथानरंगेति सुगमं

यथैवव्योम्निनीलत्वं यथानीरंमरुस्थले पुरुषत्वंयथा स्थाणौ तद्वद्विश्वंचिदात्मनि ६१ यथैवशून्येवैतालो गंधर्वाणांपुरंयथा यथाकाशेहिचंद्रत्वं तद्वत्सत्ये-जगत्स्थितिः ६२ यथानरंगकल्लोले जलमेवस्फुरत्यलं पाञ्चरूप्येणतात्मेहि ब्रह्मांडौघैस्तथात्मता ६३

किंच घटेति तत्रपादत्रयं स्पष्टं ननु किमनेन मिथ्यात्ववासनादार्ढ्येने- त्यतआह ज्ञेयमिति तदभावतो नामाभावतस्तद्ब्रह्म ज्ञेयं वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतेः ६४ ननु यत्रहिद्वैत मिवभवतीत्यादि श्रुत्यर्थदर्शनेनावस्थात्रय विदेहमोक्षावुक्तौ ननुजीव

घटनाम्नायथापृथ्वी पटनाम्नाहितंतवः जगन्नाम्नाचि दाभाति ज्ञेयंतत्तदभावतः ६४ सर्वोपिव्यवहारस्तु ब्र- ह्मणाक्रियतेजनैः अज्ञानान्नविजानंति मृदेवहि घटा दिकं ६५ कार्यकारणतानित्य मास्तेघटमृदोर्यथा तथैवश्रुतियुक्तिभ्यां प्रपंचब्रह्मणोरिह ६६

न्मोक्ष इत्याशंक्याह सर्वइति सर्वोपि लौकिको वैदिकश्चेति शेषंस्पष्टं अयं भावः अज्ञाननिवृत्तिरेवजीवन्मुक्ति र्नतुहैतादर्शनमिति ६५ तत्रहेतुं स दृष्टांतमाह कार्येति यथा सोम्यैकेन मृत्पिंडेन सर्वंमृन्मयं विज्ञातंस्यादि

त्यादिश्रुतिः युक्तिस्तु कार्यकारणयोरन्यत्वे एककारणज्ञानात्सर्वकार्यज्ञानं नस्यादित्यादि सकलमन्यत् ६५ कार्यकारणयोरनन्यत्वमेव दृष्टांतेन स्पष्टयति गृह्यमाणइति भास्करे प्रमाणनिरपेक्षतयैव भासनशीलं स्पष्टमन्यत् ६७ ननु ब्रह्मणि भासमाने प्रपंचो नभासेदित्याशंक्यावस्थाभे

गृह्यमाणेघटेयद्वन्मृत्तिकायातिवैबलात्
वीक्ष्यमाणेप्रपंचेपि ब्रह्मैवाभातिभास्करं ६७
सदैवात्माविशुद्धोस्ति ह्यशुद्धोभातिचैसदा
यथैवहिविधारज्जु ज्ञानिनोऽज्ञानिनोऽनिशं ६८

देनोभयमपि भासत इति सदृष्टांतमाह सदैवेति तत्र ज्ञानिनः सदैवात्माविशुद्धः अज्ञानतत्कार्यप्रपंचमलरहितत्वान्निःप्रपंचोस्ति अज्ञानिनस्तु सदैवाशुद्धोऽस्तीति भ्रमाद्भाति वैहीनि तत्रसिद्धो उभयत्रापि दृष्टांतः यथेति यथारज्जुर्ज्ञानिनः सर्पाभावतया निर्विषत्वेनाभयंकरी अज्ञानि

...रूपनया विपरीतत्वेन भयंकरीति द्विविधा भाति अयंभावः ब्र
ह्म यद्यपि स्वयंप्रकाशत्वेन सदाभात्येव तथापि बुद्ध्यारूढत्वेन पुरुषा
र्थोपयोगीति ज्ञानिनमतिभाति नाज्ञानिनः सूर्यदीपादिरिव चक्षुष्मदं
धयोरितिदिक् ६८ नन्वात्मा यदि सदैव निःप्रपंचत्वेन भाति तर्हि कि

यथैव मृन्मयःकुंभ स्तद्वद्देहोपिचिन्मयः
आत्मानात्मविभागोयं मुधैवक्रियतेबुधैः ६९
सर्पत्वेनयथारज्जू रजतत्वेनशुक्तिका
विनिर्णीताविमूढेन देहत्वेनतथात्मना ७०

मर्थं देहात्मभेदो वर्णित इत्याशंक्या विवेकिनो देहव्यतिरिक्तात्मबोधार्थं विवेकिनस्तु व्यर्थएवेति सदृष्टांतमाह यथेति तत्राऽबुधैरित्यऽकारप्रश्लेषे मुधैवक्रियते अपितु नेति काकुव्याख्यानं अन्यत्सर्वंसुगमम् ६९ इदानीम विवेकिनः कल्पितदेहनादात्म्यं सदृष्टांतमाह सर्पत्वेनेति ७० ६

घटत्वेनेति ७१ कनकमिति ७२ पुरुषत्वइति ७३ गृहत्वेनेति. सर्पत्वे
नेत्यादि पंचानामप्येतेषां श्लोकानामर्थः स्फुटतर एवास्त्यतो न व्याख्यानं

घटत्वेनयथापृथ्वी पटत्वेनैवतंतवः विनिर्णीता
विमूढेन देहत्वेनतथात्मता ७१ कनकंकुंडलत्वेन
तरंगत्वेनवैजलं विनिर्णीतं ७२ पुरुषत्वेय-
थास्थाणु जलत्वेनमरीचिका विनिर्णीता ७३
गृहत्वेनैवकाष्ठानि खड्गत्वेनैवलोहता वि
निर्णीता ७४ यथावृक्षविपर्यासो जलाद्धव
तिकस्यचित् तद्वदात्मनिदेहत्वं पश्यत्यज्ञो
नयोगतः ७५

कृतं ७४ नन्वन्यथा निर्णये किंकारणमितिचे त्तदज्ञानमेवेति सदृष्टां
तमाह यथावृक्षेत्यादि द्वादशभिः ७५

पोतेनेति पोतेन नौकया स्पष्टमन्यत् ७६ पीतत्वमिति ७७ चक्षुर्भ्यां

मिति ७८ अलातमिति ७९ महत्त्वइति हीति सर्वलोकमसिन्धौ८०

पोतेनगच्छतःपुंसः सर्वंभातीवचंचलं तद्वदा० ७६
पीतत्वंहियथाम्भुम्ने दोषाद्भ्रान्तिकस्यचित् तद्व० ७७
चक्षुभ्यांभ्रमशीलाभ्यां सर्वंभातिभ्रमात्मकं तद्व० ७८
अलातंभ्रमणेनैव वर्तुलंभातिसूर्यवत् तद्वदा० ७९
महत्त्वेसर्ववस्तूना मणुत्वंह्यतिदूरतः तद्वदा० ८०
सूक्ष्मत्वेसर्वभावानां स्थूलत्वंचोपनेत्रतः तद्वदा० ८१
कोचभूमौजलत्वंवा जलभूमौहिकाचता तद्वदा० ८२
यद्वद्भौमणित्वंहि मणौवाबह्नितापुमान् तद्व० ८३
अग्नेष्वप्सुसत्सुधावत्सु सोमोधावतिभातिवै तद्व० ८४

सूक्ष्मत्वेइति ८१ काचभूमाविति ८२ यद्वदिति ८३ अग्नेष्विति ८४

यथेति यथावृक्षेत्यादिश्लोकानां स्फुटार्थत्वात्पिष्टपेषणतुल्यत्वेन न-
व्याख्यानंकृतं ८५ यथाशशीनि शशीत्युपलक्षणं सूर्यादीनामपि शेषंस्प
एं ८६ एवं द्वादशभिः श्लोकैरुक्तमर्थमुपसंहरति एवमिति एवमुक्त
नप्रकारेणात्मन्यविद्यातः आत्माज्ञानात् देहाध्यासो मनुष्योहमित्यादि

यथैवदिग्विपर्यासो मोहाद्भवतिकस्यचित् तद्व
द्वा० ८५ यथाशशीजलेभाति चंचलत्वेनकस्य
चित् तद्वद्वा० ८६ एवमात्मन्यविद्यातो देहाध्या
सोहिजायते सएवात्मपरिज्ञाना लीयतेचप-
रात्मनि ८७

बुद्धिर्जायते भवति ह्रीतिप्रसिद्धौ नन्वेतस्य निवृत्तिः कुतोभवेदिति
चेदात्मज्ञानादेवेत्याहोत्तरार्द्धेन सइति सएव देहाध्यास एवात्मपरि-
ज्ञानात् ब्रह्मात्मैक्यसाक्षात्कारात्सरात्मनि अज्ञानतत्कार्यरहिते प्र

त्यगभिन्ने ब्रह्मणि लीयते ब्रह्मस्वरूपेणावतिष्ठते नह्यधिष्ठानंविना ऽऽरोपितस्य स्वरूपमस्ति चकारादध्यासकारणमज्ञानमपिलीयतइति अन्यथाऽध्यासलयाभावादित्यर्थः नहि कारणे सति कार्यस्यलयः स भवति तस्मादात्मज्ञानादेव सकारणकार्याध्यासनिवृत्तिरित्यलं पल्लु

सर्वमात्मतयाज्ञातं जगत्स्थावरजंगमं
अभावात्सर्वभावानां देहस्यचात्मताकुतः ८८
आत्मानंसततंज्ञान न्कालनयमहाद्युते
प्रारब्धमखिलंभुंज न्मोद्वेगंकर्त्तुमर्हसि ८९

वितेन ८७ एतदेव विवृणोति सर्वमिति आत्मता देहस्य नेत्यर्थः स्पष्ट मन्यत् ८८ ननु ज्ञानिनो निष्प्रपंचात्मतया मम किंस्यान्नह्यन्यभोज नेनान्यस्तृप्यतीतिचेदतआह आत्मानमिति भोमहाद्युते कामादि परामर्षेन स्वहितसाधनोन्मुखस्त्वं आत्मानं प्रत्यगभिन्नं सततं आ

स्फूर्तिमूर्तिपर्यंतं जानन् वेदांतवाक्यैर्विचारयन् कालं नयातिक्रामस्य वि
चारसाध्यज्ञानानंतरं चाखिलं प्रारब्धं चरमदेहारंभकं कर्म भुंजन् सु
खदुःखाभासानुभवेन क्षपयन्सन्नुद्वेगं कर्त्तुनार्हसीत्यर्थः ८९ यस्तु
तस्तु प्रारब्धमेव नास्ति कुतोभोगः भोगाभावे कुत उद्वेगकारणं तद
भावेच कुतस्तरां तन्निषेधोपदेश इतिवेदांतसिद्धांतरहस्यं वक्तुं प्रति

उत्पन्नेप्यात्मविज्ञाने प्रारब्धंनैवमुंचति
इतियच्छ्रूयतेशास्त्रे तन्निराक्रियतेऽधुना ९०

जानत आचार्याः उत्पन्नइति अत्रेयं प्रक्रिया जगत्प्रतीतिस्त्रिधा लौ-
किकी शास्त्रीयानुभाविकीचेति तत्राद्या पारमार्थिकी द्वितीयाऽपरमा
र्थिकी तृतीयातुप्रातिभासिकी तासां निवृत्तिस्तु क्रमात् वेदांतश्रवणा
दित्रयसाक्षात्कारप्रारब्धक्षयैर्भवति नान्यथेति तत्रेयं प्रतिज्ञाऽन्यप्रतीत्य
भिप्रायेणेति ज्ञातव्यं श्लोकार्थस्तु स्फुटएव ९० ७

व्यावहारिकी

नदेवाह तत्वेति ज्ञानेन सर्वव्यवहारकारणाज्ञाननिवृत्तौ प्रारब्धाभाव इतिश्लोकार्थः पदार्थस्तु स्फुटएव ९१ इदानीं प्रारब्धशब्दं व्युत्पाद यन्नुक्तमुपसंहरति कर्मेति तत्र कर्मत्रिविध संचितक्रियमाण प्रारब्ध भेदात् तन्मध्ये भाविदेहारंभकं संचितं तथावर्त्तमानदेहनिर्वर्त्त्यं कि

तत्वज्ञानोदयादूर्ध्वं प्रारब्धंनैवविद्यते
देहादीनामसत्त्वोक्तु यथास्वप्नोविबोधतः ९१
कर्मजन्मांतरीयंय त्प्रारब्धमितिकीर्त्तितं
तत्तुजन्मांतराभावा त्पुंसोनैवास्तिकर्हिचित् ९२

यमाणं प्रारब्धंतु वर्तमानदेहारंभकं तत्र यद्यपि संचितं जन्मांतरीयमेव तथापि भाविदेहस्य तत्प्रारब्धमेव भवति तेनेदं सिद्धमात्मनः स्वतः कर्तृत्वा भावात्कालत्रयेपि जन्मनास्तीति सर्वमवदातं ९२ ७

७ ७ सच्चिदानंदायनमः ७ ७

पूर्वोक्तं दृष्टांतं विस्तृणवन्सकारणजन्माभावे युक्तिमाह स्वप्नेवि जन्मा
भावे तत्प्रारब्धंकुतः स्पष्टमन्यत् ९३ ननु देहादिप्रपंचस्य यत्नोवेत्या
देश्रुतेः सत्यब्रह्मजन्यत्वात्कथंप्रातिभासिकत्वमितिचेदुच्यते उपादा
नमिति अत्र कारणं द्विविधं निमित्तोपादानभेदात् तत्र निमित्तं ना-

स्वप्नदेहोयथाध्यस्त स्तथैवायंहिदेहकः
अध्यस्तस्यकुतोजन्म जन्माभावेहितत्कुतः९३
उपादानंप्रपंचस्य मृद्भांडस्येवकथ्यते
अज्ञानंचैववेदांते स्तस्मिन्नष्टेकविश्वता ९४

मोत्पत्तिमात्रकारणं उपादानंतूत्पत्तिस्थितिलयकारणं तत्र वेदांतैः मा
यांतु प्रकृतिं विद्यादित्यादिभिः प्रपंचस्योपादानमज्ञानं पठ्यते तच्चा
राङ्कयापि अत्रायंभावः नकेवलं ब्रह्मैव जगत्कारणं निर्विकारत्वात्
नापि केवलमज्ञानं जडत्वात् तस्मादुभयं मिलित्वैव जगत्कारणंभव

नीति सत्यानृते मिथुनीकरोतीत्यादिश्रुतेः तत्र दृष्टांतः भांडस्य घट करकादेर्मृदिव मृत्पिंडइव तत्र जलस्थाने ब्रह्म पिंडीकरणसामर्थ्यसाम्या दज्ञानंतु मृत्तिकास्थाने आवरकत्वसाम्यात् तत्र ब्रह्मणोऽविनाशित्वाद्ब्रह्मज्ञानेन तस्मिन्नज्ञान एव नष्टेसति विश्वता जीवजगदीश्च

यथारज्जुंपरित्यज्य सर्पंगृह्णातिचेभ्रमात्
तद्वत्सत्यमविज्ञाय जगत्पश्यतिमूढधीः ९५
रज्जुरूपेपरिज्ञाते सर्पखंडनतिष्ठति
अधिष्ठानेतथाज्ञाते प्रपंचःशून्यतांगतः ९६

रात्मकजगद्भावः क्व नक्वाप्यस्तीत्यर्थः ९४ मिथुनीभावस्यैव जगत्कारणत्वं सदृष्टांतं प्रपंचयति यथारज्जुमिति ९५ इदानीं यदुक्तं तस्मिन्नष्टे क्वविश्वतेति तत् प्रपंचयन् पूर्वोक्तं प्रारब्धाभावं सदृष्टांतमुपसंहरति सार्द्धेन रज्जुरूपइति स्पष्टं ९६

किंच देहस्येति ननु जीवन्मुक्तस्य ज्ञानिनः प्रारब्धाभावेसति अत्र ब्र-
ह्मसमश्नुत इत्यादिश्रुतिः प्रारब्धं किमर्थं वक्तीतिचेदुच्यते अर्द्धेन अ
ज्ञानीति श्रुतिः अज्ञानिजनबोधार्थं प्रारब्धं वक्तीत्यर्थः ज्ञानेन सर्वव्य
वहारकारणेऽज्ञाने नष्टेसति ज्ञानिनः कथंव्यवहार इत्यज्ञानिभिराक्षि

देहस्यापिप्रपंचत्वा त्प्रारब्धावस्थितिःकुतः
अज्ञानिजनबोधार्थं प्रारब्धंवक्तिवेश्रुतिः ९७
क्षीयंतेचास्यकर्माणि तस्मिन्दृष्टे परावरे
बहुत्वंतन्निषेधार्थं श्रुत्यागीतंचयत्स्फुटं ९८

से प्रारब्धादिति तद्बोधार्थमिति शेषंस्पष्टं ९७ किंतर्हि ज्ञानिबोधार्थं वक्ति
श्रुतिरितिचेदुच्यते क्षीयंतइति भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः
क्षीयंते चास्यकर्माणि तस्मिन्दृष्टे परावर इतिश्रुत्या कर्माणीति बहुत्वं य
त् स्फुटं गीतं तत्तन्निषेधार्थं प्रारब्धाभावप्रतिपादनार्थं अन्यथा संचित

क्रियमाणापेक्षया कर्माणीति द्वित्वं गेयं तथा न गीत मतो ब्रह्मात्मसा
क्षात्कारात् चिज्जडग्रंथिभेदेन संचितक्रियमाणप्रारब्धारब्धत्रिविधकर्म
क्षयांते परमपुरुषार्थे ज्ञानिबोधार्थं श्रुतिर्वक्तीतिभावः ९८ उक्तवेपर
बाधकमाह उच्यतइति एतत्प्रारब्धमज्ञैः श्रुतितात्पर्यानभिज्ञैर्बलादवि
कसामर्थ्याच्चेदुच्यते यथार्थतया प्रतिपाद्यते चकारादद्वयात्मानं नपश्यं

उच्यतेऽज्ञैर्बलाच्चैत त्तदानर्थद्वयागमः
वेदांतमतहानंच यतोज्ञानमितिश्रुतिः ९९

तदाऽनर्थद्वयागमो दोषद्वयप्राप्तिः तत्र प्रारब्धरूपस्य द्वैतस्यांगीकारे अ
निर्मोक्षप्रसंग एकोदोषः मोक्षाभावे ज्ञानसंप्रदायोच्छेदरूपो द्वितीयो दो
षइति नकेवलं दोषद्वयस्यैव प्राप्तिरपितु वेदांतमतहानंच वेदांतमतस्या
द्वैतस्य हानं त्यागो भविष्यति प्रारब्धग्रहणरूपस्य द्वैतस्य याथार्थ्यां
स्यर्थः तर्हि किंमतिपत्तव्यमित्यतआह यतइति यतो यस्याः

ज्ञानंभवति तादृशीसा श्रुतिर्ग्राह्येतिशेषः सा श्रुतिस्तु तमेवधीरो विज्ञा
य प्रज्ञांकुर्वीत ब्राह्मणः नानुध्यायाद्बहून्शब्दान् वाचोविग्लापनंहिन-
दिति एतदभिप्रायः क इतिचेल्लिख्यते धीरो विवेकी ब्राह्मणो ब्रह्मभा
वितुमिच्छु स्तमेव वेदांतमसिद्धमात्मानं विज्ञाया ऽऽदावुपदेशतः शास्त्र
तश्च ज्ञात्वा ऽनंतरं प्रज्ञां शास्त्राचार्योपदिष्टविषया मपरोक्षानुभवपर्यं
तां जिज्ञासापरिसमाप्तिकरीं कुर्वीत बहून् कर्मोपासना प्रतिपादकान्
शब्दान् वाक्यसंदर्भान्नानुध्यायान्नचिंतयेत् तर्हि तान् ब्रूयात्किंनेत्याह
वाचइति तद्वैतशास्त्रपठनं वाचोविग्लापनं विशेषेणश्रमकरं हीति सर्वानु
भवसिद्धमित्यलंपल्लवितेन ९९ तदेवमेतावता ग्रंथसंदर्भेण मुख्याधि
कारिणो वैराग्यादिसाधनचतुष्टयपूर्वक वेदांतवाक्यविचार एवमत्यग-
भिन्नब्रह्मापरोक्षज्ञानद्वारा मुख्यं मोक्षकारणमित्यभिहितं इदानीमस
त्कर्हिचार्यापि बुद्धिमांद्यविषयासक्त्यादिप्रतिबंधेनापरोक्षज्ञानं यस्य न
जायते तस्य तदधिकारिणो निर्गुणब्रह्मोपासनमेव मुख्यं साधनमित्य

भिधेय ससाधनं ध्यानयोगं प्रतिजानत आचार्याः त्रिपंचेति अथो शब्दोधिकारी भेदार्थः क्वचिदतइतिपाठस्तस्मिन्पक्षे यतो मंदाधिकारी विचारं नलभते ऽतोहेतोरित्यर्थः त्रिपंच त्रिगुणितानिपंच पंचदशेत्यर्थः तत्संख्याकान्यंगानि निदिध्यासनांगिसाधकसाधनविशेषान् यज्ञसाधक प्रयाजादिवदित्यर्थः वक्ष्ये वक्ष्यामि तैर्वक्ष्यमाणैः सर्वैरंगैर्निदिध्यासन

त्रिपंचांगान्यथोवक्ष्ये पूर्वोक्तस्यहिलब्धये
तैश्चसर्वैःसदाकार्यं निदिध्यासनमेवतु १००

मेव कार्यं नतु तूष्णीमवस्थानमुचितमित्यर्थः निदिध्यासन कर्तव्यप्रतिज्ञामयोजनमाह पूर्वोक्तस्येति पूर्वोक्तस्य स्वरूपावस्थानलक्षणमोक्षस्य सिद्ध्यइति हीति वेदांतप्रसिद्धौ तुशब्दः पातंजलवैलक्षण्यलक्षणेन मोक्षस्य सिद्ध्यइति अनेनाष्टांगप्रतिपादकं पातंजलमवैदिकत्वाद्वैशेषिकादिवदनादेयमितिध्वनितं १०० ७ ७

मंदाधिकार्यन्यत्सर्वं कर्म सगुणोपासनविचाररूपं साधनंच विहाय श्र
ह्यात्मार्थोक्तप्रकारेण निर्गुणं ब्रह्मैव निदिध्यासेदित्याह नित्येति स्पष्टं १०१

नित्याभ्यासादृतेनास्ति नृभवेत्सच्चिदात्मनः
तस्माद्ब्रह्मनिदिध्यासे ज्जिज्ञासुःश्रेयसेचिरं १०१
यमोहिनियमस्त्यागो मौनंदेशश्चकालता
आसनंमूलबंधश्च देहसाम्यंच दृक्स्थितिः १०२
प्राणसंयमनंचैव प्रत्याहारश्चधारणा
आत्मध्यानंसमाधिश्च प्रोक्तान्यंगानिवैक्रमात् १०३

ननु कानि तान्यंगानि यैःसह निदिध्यासनं कर्तव्यमित्यपेक्षायां तानिनिर्दिशति
यमइति ह्याभ्यां उक्तानार्थावुक्तावपिश्लोकौ १०२ १०३ ५

इदानीमेतेषां प्रत्येकंनिर्देशक्रमेण स्वाभिमतानि लक्षणान्याह सर्वमित्याद्येक विंशत्या. तत्र प्रथमोद्दिष्टं यमंतावद्दर्शयति सर्वमिति सर्वमाकाशादिदेहां तंजगद्ब्रह्म बाधसामानाधिकरण्यद्वारा स्थाणुपुरुषादिवदित्यर्थः इति वि ज्ञानान्निश्चयाद्धेतोरिंद्रियाणां श्रोत्रादीनामेकादशकरणानां ग्रामः समूह स्त

सर्वंब्रह्मेतिविज्ञाना दिंद्रियग्रामसंयमः
यमोयमितिसंप्रोक्तो ऽभ्यसनीयोमुहुर्मुहुः १०४
सजातीयप्रवाहश्च विजातीयतिरस्कृतिः
नियमोहिपरानंदो नियमाक्रियतेबुधैः १०५

स्यसंयमः सम्यक् शब्दादिविषयाणां विनाशित्वसातिशयत्वदुःखदत्वादिदो षदर्शनात् यमो विषयेभ्योनिवारणं अयंयम इतिसंप्रोक्तः नतु केवलमौ दासीत्यर्थः ततश्च किमतआह अभ्यसनीयइति अयं मुहुर्मुहुरभ्यसनीयइति १० एवं यमंलक्षयित्वा नियमंलक्षयति सजातीयेति सजातीयं प्रत्यगभिन्नंपरं

ब्रह्म तदेकाकारोवृत्तिप्रवाहः सजातीयप्रवाहः यद्वा सजातीयानामसंगो हमधिक्रियोहमित्यादिप्रत्यगभिन्नब्रह्मप्रत्ययानां प्रवाहः च पुनः विजातीयतिरस्कृति विजातीयं ब्रह्मात्मविलक्षणं जगत्पूर्वसंस्काराज्जायमाना तदाकारावृत्तिरित्यर्थः तस्य तिरस्कृतिर्दोषस्मृत्याऽधिक्षेपेक्षाऽनादरइत्यर्थः अयं नियम इत्यर्थः नतु केवलं शौचादिरित्यर्थः हीत्युपनिषत्समाप्तिः

त्यागःप्रपंचरूपस्य चिदात्मत्वावलोकनात्
त्यागोहिमहतांपूज्यः सद्योमोक्षमयोयतः १०६

द्वौ नन्वनयोरुपनिषत्समाप्तिश्चा कःपुरुषार्थ इतिचेदतआह परानंदइति ततश्चकिमतआह नियमादित्यादिस्फुटमं १०५ इदानीं तृतीयं त्यागं लक्षयति त्यागइति प्रपंचरूपस्य प्रपंचो नामरूपलक्षणो रूप्यते घटोयं पटोयमित्यादि नामरूपतो निरूप्यते व्यवह्रियते प्रकाश्यते येन तत्प्रपंचरूपं सर्वाधिष्ठानभूतं पदार्थस्फुरणं तस्य चिदात्मत्वावलोकना च्चिदजडं

स्वत एवप्रकाशमानंब्रह्म तदात्मास्वरूपंयस्य तद्ब्रह्मचक्षुस्थावलोकनम् नुसंधानं तस्माद्धेतोर्यस्त्यागः नामरूपोपेक्षा स एवत्यागस्त्यागश्च ब्दवाच्यः ईशावास्यमिदंसर्वमित्यादिश्रुतेः हीति विद्वदनुभवप्रसिद्धौ नन्वयं त्यागो नकुत्रापि प्रसिद्ध इत्याशङ्क्याह महतांपूज्यइति तद्धेतुः सद्यइति यतोयंत्यागः सद्योनुसंधानकालएव मोक्षमयः परमानंदस्व

यस्माद्वाचोनिवर्तंते अप्राप्यमनसासह
यन्मौनंयोगिभिर्गम्यं तद्ब्रह्मेत्सर्वदाबुधः १०७

रूपावस्थानरूपः अतएवात्मतत्वविदामिष्टत्वादितिप्रसिद्धोयं त्यागइत्यर्थः तस्मादयमेव मुमुक्षुणा कर्त्तव्यो नान्यः केवलस्वकर्माद्यकरणरूप इतिभावः एवमग्रेप्यूह्यं १०६ अथमौनं लक्षयति यस्मादिति शब्दवृत्तिनिमित्तजातिक्रियादेरभावात् मनोवाचामगोचरं यन्मौनं वक्तुमशक्यं यद्ब्रह्म तथापि योगिभिर्गम्यं ज्ञानयोगिभिः प्रत्यगभिन्नत्वेन प्रा

व्यं तत्प्रसिद्धमेव ब्रह्मरूपंमौनं सर्वदा बुधो विवेकी भवेत्तदहमस्मीत्यनु
संदध्यादित्यर्थः १०७ नन्विदं प्रत्यगभिन्नब्रह्मानुसंधानं ध्यानरूपं चतु
र्दशमंगं प्रतीयते इत्याशंक्य स्वारस्यात्प्रकारांतरेण मौनमेव लक्षयति
सार्द्धेन वाचइति अयंभावः शब्दप्रवृत्तिनिमित्ताभावाद्ब्रह्म यथावागधि

वाचोयत्प्रान्निवर्त्तंते तद्वक्तुंकेनशक्यते
प्रपंचोयदिवक्तव्यः सोपिशाब्दविवर्जितः १०८
इतिवातद्भवेन्मौनं सतांसहजसंज्ञितं
गिरामौनंतुबालानां प्रयुक्तंब्रह्मवादिभिः १०९

षयं तथानामरूपजाल्यादिप्रपंचोपि सदसदादिविकल्पासहत्वाद्वागती-
नः १०८ इतीति इत्युक्तप्रकारेण ब्रह्मजगतोर्विवादस्यागरूपंवा तन्मौनं
भवेत् केषामित्याकांक्षायां सतांचेदंप्रसिद्धमित्याह सतामिति सत्पुरुषा
णां सहजस्थितिनाम्ना प्रसिद्धमित्यर्थः ननु वाङ्नियमनमेव प्रसिद्धमौ

इदानीं देहसाम्यं लक्षयति अंगानामिति अंगानां ब्रह्मण्यव्यक्तानां स्व
भावविषम्राणामधिष्ठानसमत्वदृष्ट्या समतां विधाज्जानीयात् चेत्तस्मे
ब्रह्मणि अंगवैषम्यमित्यत्राध्याहारः नचेन्नीयते समब्रह्मरूपतया न
निष्पतीत्यर्थः नहीत्यत्रशेषः शुष्कवृक्षवदंगाना मृजुत्वं सरलत्व मचंचलत्वं

अंगानांसमतांविद्या त्तस्मेब्रह्मणिलीयते
नोचेन्नैवसमानत्व मृजुत्वंशुष्कवृक्षवत् ११५
दृष्टिंज्ञानमयींकृत्वा पश्येद्ब्रह्ममयंजगत्
सादृष्टिःपरमोदारा ननासाध्यावलोकिनी ११६

चयत्तत्समानत्वं नैवभवेदितिसंबंधः अंगानां विषमस्वभावत्वादिति भाव:
११५ इदानीं दृक्स्थितिं लक्षयति दृष्टिमिति ब्रह्मणिफलव्याप्यत्वाभावेपि
वृत्तिव्याप्यत्वात् दृष्टिमंतःकरणवृत्तिं ज्ञानमयीमखंडब्रह्माकारां कृत्वा ज
गत्सर्वं ब्रह्ममयं पश्येत् ब्रह्मैवेदंसर्वमित्येतावन्मात्रैव वृत्तिःकार्येति-

भावः स्पष्टमन्यत् ११६ ननु तथापि ब्रह्मणि वृत्तिप्रवृत्तिनिमित्तजात्या-
द्यभावादिंद्रियादि प्रत्यक्षविषयस्यजगतो ब्रह्मरूपत्वेन दर्शनं कथंस्यादि
त्याशंक्य स्वारस्यात्पक्षांतरेणाह दृष्टीति वाशब्दःपक्षांतरे दृष्टीत्यादिना
श्रोत्रादि सर्वेन्द्रियवृत्तीनामुपलक्षणं यत्र यस्मिन् ब्रह्मस्वरूपे दृश्यादि सर्वेन्द्रि

दृष्टिदर्शनदृश्यानां विरामोयत्रवाभवेत्
दृष्टिस्तत्रैवकर्त्तव्या नानासाग्रावलोकिनी ११७
चित्तादिसर्वभावेषु ब्रह्मत्वेनैवभावनात्
निरोधःसर्ववृत्तीनां प्राणायामःसउच्यते ११८

वृत्तीनां विरामो लयोभवेत्तत्र तस्मिन्नेव प्रपंचातीते दृष्टिरंतःकरणवृत्तिः कर्त्त
व्या नासिकाग्रावलोकिनीत्यर्थः ११७ अथ प्राणायामं लक्षयति चित्तादीति
मनोधीनत्वात्प्राणस्य मनोनिरोधेनैव प्राणनिरोधः नतुप्राणनिरोधेनैव मा
नंजलाग्निमतेन मनोनिरोधस्तदधीनत्वात्तावादिति फलितार्थः ११८

अमुं प्राणायामं स्वाभिमतेन रेचकादिविभागत्रयेण लक्षयति सार्द्धेन निषे धनमिति स्पष्टं ११९ तत इति अनात्मोपेक्षाऽऽत्मानुसंधानतद्दार्ढ्यानि रे चकादिशब्दवाच्यानीतिभावार्थः नन्वयं त्रिविधोपि प्राणायामो नकुत्रापि श्रुत इत्यपेक्षायामत्राधिकारिणमाहार्द्धेन अयमिति अयमुक्तलक्षणः प्रा

निषेधनंप्रपंचस्य रेचकाख्यःसमीरणः
ब्रह्मैवास्मीतिवायुवृत्तिः पूरकोवायुरीरितः ११९
ततस्तद्वृत्तिनैश्चल्यं कुंभकःप्राणसंयमः
अयंचापिप्रबुद्धाना मज्ञानांघ्राणपीडनं १२०

णायामश्चकाराद्भेदत्रययुक्त इत्यर्थः प्रबुद्धानां प्रकर्षेणासंभावनादिरहि तत्वेन बुद्धानामात्मबोधयुक्तानां निःसंदेहाऽपरोक्षज्ञानिनामित्यर्थः यो ग्य इत्यध्याहारः तर्ह्यज्ञानां कीदृश इत्यत आह अज्ञानामिति १२०

इदानीं प्रत्याहारं लक्षयति विषयेष्विति विषयेषु घटादिषु यद्वा शब्दादिषु अन्वयव्यतिरेकाभ्यामात्मतां सत्तास्फुरत्तात्रियतामात्मतां दृष्ट्वानुसंधाय मनसोंतःकरणस्य विति मज्जनं नामरूपक्रियानुसंधानराहित्येन चित्स्वरूपतयावस्थानं सप्रत्याहारः ततः किमतआह अभ्यसनीयइति १२१ धारणां ल

विषयेष्वात्मतांदृष्ट्वा मनसश्चितिमज्जनं
प्रत्याहारःसविज्ञेयो ऽभ्यसनीयोमुमुक्षुभिः १२१
यत्रयत्रमनोयाति ब्रह्मणस्तत्रदर्शनात्
मनसोधारणंचैव धारणासापरामता १२२

क्षयति यत्रेति यत्रयत्र यस्मिन्यस्मिन् पदार्थे मनोयाति गच्छति तत्रतत्र ब्रह्मणः सत्तादिभावस्य नामाद्युपेक्षया दर्शनादनुसंधानान्मनसोधारणं ब्रह्मण्येवस्थिरीकरणं धारणेत्यर्थः नन्वाधारादिषट्चक्रमध्ये एकत्र मनसोधारणं धारणेति प्रसिद्धमतआह सेति साऽग्रोक्तलक्षणा धारणा परोक्ष

षामता नत्वबोधवतामित्यर्थः अन्यातु पातंजलाभिमता प्राणायामादिवद परेतिभावः चएवेत्यव्ययद्वयं वेदांतविहदनुभवमसिद्धिं द्योतयति १२२ अथात्मध्यानं लक्षयति ब्रह्मैवेति सहृत्या सती प्रमाणांतरबाधायोग्या वृत्तिस्तया वृत्त्या निरालंबतया देहाद्यनुसंधानरहितत्वेन स्थितिरवस्थानमि

ब्रह्मैवास्मीतिसहृत्या निरालंबतयास्थितिः
ध्यानशब्देनविख्याता परमानंददायिनी १२३
निर्विकारतयावृत्त्या ब्रह्माकारतयापुनः
वृत्तिविस्मरणंसम्यक् समाधिर्ज्ञानसंज्ञकः १२४

त्यर्थः शेषंस्पष्टं १२३ अथांत्यं समाधिरूपं पंचदशमंगं लक्षयति निर्विकारतयेति निर्विकारतया विषयानुसंधानरहिततयांतःकरणवृत्त्याः पुनरनंतरमेव ब्रह्माकारतया यत्सम्यक् प्रपंचसंस्काररहितं ध्यानध्येयाकारवृत्तिशून्यं वृत्तिविस्मरणं द्वैताननुसंधानं स समाधिः पंचदशमंगमित्यर्थः ननु

वृत्तिविस्मरणस्याज्ञानरूपत्वात्कथंसमाधित्वमित्याशंक्य ब्रह्मात्मैक्यबोधाभावे केवलवृत्तिविस्मरणस्य तथात्वेपि न ब्रह्मज्ञानसहितस्य तथात्वमित्याशयेन समाधिं विशिनष्टि ज्ञानसंज्ञकइति ज्ञानमिति संज्ञायस्य सज्ञानसंज्ञकः ब्रह्माकारतया स्फुरणरूप इत्यर्थः उक्तंच समाधिः संविदुत्पत्तिः

इमंचाक्रत्रिमानंदं तावत्साधु समभ्यसेत्
वश्योयावत्क्षणात्पुंसः प्रयुक्तःसन्भवेत्स्वयं १२५
ततःसाधननिर्मुक्तः सिद्धोभवतियोगिराट्
तत्स्वरूपंनचेतस्य विषयोमनसोगिरां १२६

परजीवैक तांप्राप्नोतीति १२४ इदानीं यद्यर्थे सांगमिदं निदिध्यासनमुक्तं तदाह इममिति अक्रत्रिमानंदं स्वरूपभूतानंदाभिव्यंजकं निदिध्यासनमित्यर्थः चकारात्तद्यायुक्तिवेदांतविचारमपीति स्पष्टमन्यत् १२५ एवमभ्यसतः फलमाह ततइति साधननिर्मुक्तः साधनाभ्यासरहितइत्यर्थः एतस्य योगिनः तद्वदानम

सिद्धं स्वरूपं ब्रह्मैवेति भावः १२६ अखंडैकरसब्रह्मस्वरूपत्वेनावस्थानलक्षणमोक्षफलदोऽयंसमाधिपर्यंतो योगो गुर्वनुग्रहवता सुकरोस्ति तथापि सुकर इत्यनादरो नकार्यः विघ्नबाहुल्यसंभवादित्याह द्वाभ्यां समाधाविति स्पष्टोऽर्थः १२७ लयइति तत्रलयो निद्रा तमः कार्याकार्यविवेकः विक्षेपो विषयस्फुरणं

समाधौक्रियमाणेतु विघ्नान्यायांतिवेबलात् अनुसंधानराहित्य मालस्यंभोगलालसं १२७ लयस्तत्रश्चविक्षेपो रसास्वादश्चशून्यता एवंयद्विघ्नबाहुल्यं त्याज्यंब्रह्मविदाशनैः १२८ भाववृत्त्याहिभावत्वं शून्यवृत्त्याहि शून्यता ब्रह्मवृत्त्याहिपूर्णत्वं तथापूर्णत्वमभ्यसेत् १२९

रसास्वादो धन्योहमित्याद्यानंदाकारवृत्तिः चपुनः शून्यता चित्तदोषः रागद्वेषादितीव्रवासनया चित्तस्यस्तब्धीभावः कषायः क्षुब्धतेत्यर्थः स्पष्टमन्यत् १२८ वृत्तिरेवबंधमोक्षकारणमित्याह भावेति भाववृत्त्या घटाद्याकारवृत्त्या भावत्वं

न्मयत्वं भवतीतिशेषः शून्यवृत्त्या अभाववृत्त्या शून्यना जडतेत्यर्थः हीनेति लोकप्रसिद्धौ तथा ब्रह्माकारवृत्त्या पूर्णत्वं हीनेविद्वत्प्रसिद्धौ ततःकिमतआह पूर्णत्वमिति १२९ इदानीं ब्रह्ममयीवृत्तिं स्तोतुं तद्वृत्तित्यागपरान्निंदति येहीति ये एनां ब्रह्मारव्यांवृत्तिंजहति

येहिवृत्तिंजहत्येनां ब्रह्मारव्यांपावनींपरां नेतुवृथैवजीवंति पशुभिश्चसमानराः १३० येहिवृत्तिंविजानंति ज्ञात्वापि वर्द्धयंतियेनेवैसत्पुरुषाधन्या वंद्यास्तेभुवनत्रये १३१ येषांवृत्तिःसमाख्याता परिपक्वात्मसापुनः नेवैसद्ब्रह्मनामासा नेतरेशब्दवादिनः १३२ कुशलाब्रह्मवार्त्तायां वृत्तिहीनाःसुरागिणः नेष्यज्ञानितयानूनं पुनरायांतियांतिच १३३

त्यजंति नेतु वृथैवजीवंतीत्यन्वयःस्पष्टमन्यत् १३० संप्रति तामेववृत्तिं विवर्द्धयितुं ब्रह्मवृत्तिपरान्सत्पुरुषान् स्तौति येहीतिस्पष्टं १३१ एवं ब्रह्मवृत्तिपरान्स्तुत्वा ऽधुना तेषां ब्रह्मप्राप्तिरूपंफलमाह येषामितिसुगमं १३२ तानेव शब्दमात्रिनो निंदति कुशलाइति स्पष्टम् १३३

यत एवं तस्माद्ब्रह्मनिष्ठैर्ब्रह्मवृत्त्यैव सर्वदा स्थातव्यमिति सूचयितुं ब्रह्मादिनामुदाहरणमाह निमेषेति यथा ब्रह्माद्यास्तथासनकाद्याः यथा सनकाद्यास्तथाशुकाद्या इति संप्रदायो दर्शितः एतेन ब्रह्मादिसेव्यत्वादतिश्रेष्ठोयं समाधिपर्यंतो राजयोगः सर्वदा मुमुक्षुभिः सेवनीय इति ध्वनितं १२४ त

निमेषार्द्धं न तिष्ठंति वृत्तिंब्रह्ममयींविना
यथातिष्ठंतिब्रह्माद्याः सनकाद्याःशुकादयः१२४
कार्यकारणतायाता कारणेनहिकार्यता
कारणत्वंततोगच्छे त्कार्याभावेविचारतः १२५

देवं स्वाभिमतं सांगंराजयोगमभिधाय पूर्वोपक्रांतसांख्यापरपर्यायं वेदांतविचारमुपसंहरति कार्यं इत्यादिपंचभिः श्लोकैः कार्येति कार्यं घटपटादिरूपे विकारे कारणता मृत्तंत्वादिरूपा सर्वविकाराधिष्ठानता आयाताऽनुगता कारणे कार्यता नहीति प्रसिद्धं ततः कारणात्कार्याभावे कारणत्वं गच्छेत् ननु

थंकारणे कार्याभाव इत्यतआह विचारनइति यथायं दृष्टांतस्तथाकाशादिकार्ये कारणता आकाशोस्तिभातीत्यादिव्यवहारहेतुभूता सत्यज्ञानादिरूपब्रह्मणः कारणता आत्माना अनुगता कारणे ब्रह्मणीतु आकाशादिकार्यता नहीति अतः परमार्थतः आकाशाद्यभावे ब्रह्मणः कारणतापि नहीति दार्ष्टांतिकोऽर्थः १३५ ततः किमत्त आह अथेति अथानंत

अथशुन्दंभवेद्वस्तु यद्वैवाचामगोचरं
द्रष्टव्यंमृद्घटेनेव दृष्टांतेनपुनःपुनः १३६

रं कार्यकारण भावनिवृत्तौ यच्छुन्दं मनोवाचामगोचरं वस्तु तद्भवेत् यतो वाचो निवर्त्तंत इत्यादि श्रुतिप्रसिद्धि द्योतनार्थो हिशब्दः ननु शुन्दः क्षणिकत्वेनैकदा तथा विचारितेपि पुनरन्यथैव भातीत्यतआह द्रष्टव्यमिति १३६ नकेवलमयं विचारो ज्ञानसाधनमेवापितु ध्यानसाधनमपीत्याह

अनेनेति अनेनैवप्रकारेण शुद्धचित्तानां वृत्तिज्ञानं उदेति ततः परं ब्रह्मात्मिका वृत्तिर्भवेदिति योजना पदानामर्थस्तु स्फुट एव १३७ तमेव विचारं विशदयति द्वाभ्यां कारणमिति आदौ प्रथमं कारणं व्यतिरेकेण कार्यविरहेण विचारयेत् पुनस्तत् कारणमन्वयेना

अनेनैवप्रकारेण वृत्तिर्ब्रह्मात्मिकाभवेत्
उदेतिशुद्धचित्तानां वृत्तिज्ञानंततःपरं १३७
कारणंव्यतिरेकेण पुमानादौविलोकयेत्
अन्वयेनपुनस्तद्धि कार्यंनित्यं प्रपश्यति १३८
कार्यंहिकारणंपश्ये त्पश्चात्कार्यं विसर्जयेत्
कारणत्वंततोगच्छे दवशिष्टंभवेन्मुनिः १३९

नुरस्या कार्यंपि नित्यं प्रपश्यतीति १३८ अथवैवं विचारयेदित्याह कार्यंति आदौ कार्यं कारणमेव विचारयेत् पश्चात्तत्कार्यं विसर्जयेत् नानुसंदध्यात् कार्यवर्जने सति कारणत्वं स्वत एव गच्छेत् एवं कार्यकारणवर्जनेऽवशि

ष्टुं सच्चिन्मात्रं मुनिर्मननशीलः स्वयमेव भवेदिति १३९ ननु विचारजन्या परोक्षज्ञानेन मुनेर्ब्रह्मत्वं भवतुनाम परंतु परोक्षज्ञानिनः कथं भवेदित्या शंक्य तीव्रभावनया परोक्षज्ञानिनोपि ब्रह्मत्वं भवेदिति सदृष्टांतमाह भा वितमिति अयंभावः यद्यपि परोक्षज्ञानेन प्रमातृगतावरणनिवृत्तौ सत्याम पि प्रमेयगतमावरणं न निवर्त्तते तथापिनिश्चयात्मना निश्चययुक्तबुद्धि

भावितंतीव्रवेगेन यद्वस्तुनिश्चयात्मना
पुमांस्तद्धिभवेच्छीघ्रं ज्ञेयंभ्रमरकीटवत् १४०

मता पुरुषेण यद्वस्तु सच्चिदानंदब्रह्म तीव्रवेगेनाऽहर्निशं ब्रह्माकारवृत्त्या भा वितं चिंतितं तद्वस्तु ज्ञेयमपरोक्षेण ज्ञातुं योग्यं ब्रह्म शीघ्रमचिरेण पुमान् भवेत् प्रत्यगभिन्नब्रह्मभावनया पुरुषो ब्रह्मरूपो भवतीत्यर्थः हीति वि-हृत्यसिद्धौ नन्न सर्वलोकप्रसिद्धं दृष्टांतमाह भ्रमरकीटवदिति भ्रमरेण कुत-श्चिदानीय जीवन्नेव स्वकुट्यां प्रवेशितो यः कीटः स यथा भयात् भ्रमरस्या

नेन भ्रमरएव भवति तद्वदिति १४० यदि पूर्वश्लोकोक्तदृष्टांते भावनाबलादेवान्यस्यान्यत्वं भवेत् तर्हि ब्रह्मविवर्त्तत्वेन ब्रह्मरूपस्य विश्वस्य ब्रह्मभावनया तद्रूपता भवेदिति किमुवक्तव्यमित्याशयेन सर्वात्मभावनामाह अदृश्यमिति अदृश्यं परोक्षं भावरूपं प्रत्यक्षंच सर्वविश्वं यद्वा अदृश्यं द्रष्टृ

अदृश्यंभावरूपंच सर्वमेवचिदात्मकं
सावधानतयानित्यं स्वात्मानंभावयेद्बुधः १४१
दृश्यंह्यदृश्यतांनीत्वा ब्रह्माकारेणचिंतयेत्
विद्वान्नित्यसुखेतिष्ठे द्धियाचिद्रसपूर्णया १४२

रूपं भावरूपं दृश्यं चकारादृश्यं एतत्सर्वं निपुत्थात्मकं जगद्भ्रांत्याऽऽत्मभिन्नत्वेभासमानमपि चिदात्मकं निर्विशेषस्फुरणमात्रस्वरूपं स्वात्मानमेव बुधः अद्वैतज्ञाननिष्ठः सावधानतया स्थिरतया नित्यं भावयेत्सकलमिदमहंच ब्रह्मैवेति सर्वदा पश्येदित्यर्थः १४१ एतदेव विवृणोति दृश्यमिति दृश्यं घटादिकमदृश्यतामधि

स्थानचिद्रूपतां नीत्वा दीप्तिविह्न्यग्निन्द्वो ब्रह्माकारेण कल्पितस्य परिच्छिन्नस्य नामरूपादेर्निवृत्तिपूर्वकं बृहदाकारेणापरिच्छिन्नरूपेण चिंतयेदित्यर्थः तत्किमत्र आह विद्यानिति चिद्रूपपूर्णया चिदेवरसश्चिद्रूपश्चिदानंदस्तेन पूर्णया धिया नित्यस्फुरत्ते अधिनाधिस्फुरत्ते विद्यांस्तिष्ठेदिति १४२ इदानीमुक्त

एभिरंगैः समायुक्तो राजयोगउदाहृतः
किंचित्यक्तकषायाणां हठयोगेनसंयुतः १४३

स्वाभिमतयोगमुपसंहरति एभिरिति किंचित्त्यक्तं पक्वाः दग्धाः कषाया रागादयो येषां तेषां हठयोगेन पातंजलोक्तेन यमनियमाद्यष्टांगयोगेन संयुतोयं वेदांतोक्तो योगइति शेषंस्पष्टं १४३ अयं राजयोग एव के

BHARATIYA

षां योग्य इत्याकांक्षायां सर्वग्रंथार्थमुपसंहरन्नाह परिपक्वमिति येषां मनः प
रिपक्वं रागादिमलरहितमितियावत् तेषामित्यध्याहारः तेषां जितारिषड्वर्गाणां
पुरुषधुरंधराणां केवलः पातंजलाभिमतयोगनिरपेक्षः अयं वेदांताभिमतो यो
गः सिद्धिदः प्रत्यगभिन्नब्रह्मापरोक्षज्ञानद्वारा स्वस्वरूपावस्थानलक्षणमुक्ति
प्रदः चकारोऽवधारणे नान्येषामपरिपक्वमनसामित्यर्थः ननु परिपक्व मनस्त्व

परिपक्वंमनोयेषां केवलोयंचसिद्धिदः गुरुदैवतभक्तानां
सर्वेषांफलभोजवात् १४४ इति श्रीपरमहंसपरिव्राजका
चार्य श्रीमच्छंकरभगवता विरचिताऽपरोक्षाऽनुभूतिः समा॰

मतिदुर्लभमित्याकांक्षायामस्यापि साधनत्वादतोप्यंतरंगसाधनमाह गुरुदैवतभ
क्तानामिति जपादिनशीघ्रमित्यर्थः सर्वेषामिति पदेन वर्णाश्रमादि निरपेक्षं मनु
ष्यमात्रं गृहीतव्यं अतएव गुरुदैवतभक्तेरंतरंगत्वं तथाचश्रुतिः यस्यदेवेपराभक्ति
र्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाः प्रकाशंतेमहात्मनइति स्मृतयश्च तद्विद्धि

प्रणिपातेन श्रद्धावान्लभतेज्ञानमित्याद्याः अयंभावः परिपक्वमनसोपिदुःसाध्यानि साधनानि गुरुदैवतभक्तानां सुसाध्यानिभवंतीतिहेतोर्गुरुदैवतभजनमेव स्वधर्माविरोधेन सर्वैः कार्यमिति परमं मंगलं १४४ पूर्णेयमापरोक्ष्येण नित्यात्मज्ञानकाशिका अपरोक्षानुभूत्याख्य ग्रंथराजप्रदीपिका १ नमस्तस्मैभगवते शंकराचार्यरूपिणे येनवेदांतविद्येय मुद्धृतावेदसागरात् २ यद्ययंशंकरःसाक्षा द्वेदांतांभोजभास्करः नो दृष्यत्तर्हिकाशेन कथंव्यासादिसूचितं ३ अन्यथत्संमतंकिंचि त्तद्गुरोरेवमेनहि असंमतंतुयल्लिंचि त्तन्मैवगुरोर्नहि ४ यत्प्रसादादहंशब्द प्रत्ययालंबनोह्ययः अहंसजगदालंबः कार्यकारणवर्जितः ५ तस्यश्रीगुरुराजस्य पादाब्जेतुसमर्पिता दीपिकामालिकासेयं तत्कृपागुणगुंफिता ६ योहंस्वाज्ञानमाश्रज्जगदिदमभवत्सादिदेहांतमादौ स्वस्वप्नादिवदेवसोहमधुनास्वज्ञानतःकेवलं ब्रह्मैवास्म्यहमीयंपरमसुखमयंनिर्विकारंविबाधं जामत्स्थानवदेवदेवगुरुसत्कल्पप्रसादोत्थितान् ७ इतिश्री परमहंसपरिव्राजकाचार्य श्री विद्यारण्यमुनि विरचिताऽपरोक्षानुभूतिदीपिका समाप्तिमगमत् ७.

इदं पुस्तकं मुंबय्यांस्थनगर्यां गायगणजी चौकमजीति विदितेन जगदीश्वरस्य शिलायंत्रे मुद्रापितम्. संवत् १९२५

इत्यपरोक्षानुभूतिः समाप्ता